In the month of Vaiśākha (April-May) from the first day of the bright half to the ninth the usual Rāmāyaṇa *navāhna* took place in the Sarasvatī temple at Chakiya. *Pāṭhakartā* was the pujāri of Thakur Ji. The *pravacanakartās* were Śrī Sivanarayana Vyasa, Ramprasad Avasthi, Sant Kumar of Navab Ganj, S. D. Sri Vaisnava of Chakiya. The discourses were held in Kālī temple. The Chairman of the Trust, H. H. Dr Vibhuti Narain Singh, attended the *navāhna pārāyaṇa* daily.

### Maharaja Kashiraja Dharma Karya Nidhi

Under this Trust various religions rites are celebrated during the whole year. Besides, this Trust also conducts three educational Institution—Maharaja Balwant Singh Degree College, Maharaja Manasa Ram Law College and Maharani Ram Ratna Kunwari Sanskrit Paṭhaśālā.

# पुराणम्

(भागः-२६; अङ्कः-२)

# PURĀṆA

(Vol. XXVI. 2)

# संस्कृत-खण्डः

संस्कृतविद्वांसोऽभ्यर्थ्यन्ते यत्ते पुराणपत्रिकायां प्रकाशनार्थम् (१) पुराणगत-दर्शनशास्त्र-धर्मशास्त्रविषयपरान् लेखान् (२) पुराणोक्त-दुरूहार्थकास्पष्टार्थकवचनव्याख्यापरान् लेखांश्च प्रेषयेयुरिति ।

# आङ्ग्लभाषानिबद्धानां लेखानां संक्षेपाः

## भागवतपुराणे भगवतोऽभिव्यक्तयः

## MANIFESTATIONS OF DIVINE IN THE BHĀGAVATA PURĀṆA

DR. DANIEL P. SHERIDAN

श्रीमद्भागवतमहापुराणे भगवतः श्रीकृष्णस्य चरितं प्रधानप्रतिपाद्यं वर्तते। भगवान् श्रीकृष्णः भगवतो विष्णोः पूर्णावतारोऽत एव स्वयमेव सर्वोच्च-नियामको विष्णुर्ब्रह्म वा - कृष्णस्तु भगवान् स्वयम्। अधर्मप्रावल्ये सति भगवतो-ऽतारग्रहणं प्रथितमेव। वैष्णवानां भक्तिसम्प्रदाये भगवतः श्रीकृष्णस्य चरितं मुख्यमेव प्रतिपाद्यं वर्तते। अत्रास्मिन् निबन्धे विदुषा लेखकेन भगवतो गुणावतार-अंशावतार-लीलावतार-कलावतार-पूर्णावतारादिविविधावताराणां सम्यक् विवेचनं विधाय प्रतिपादितं यद् भगवान् श्रीकृष्णो भगवतो विष्णोः पूर्णावतारः अत एव स्वयमेव भगवान्।

## पुराणानां पाठान्तरस्य विवेचनं तेषां पुराणानां पाठसमीक्षित-संस्करणेषु प्रभावश्च

## SOME OBSERVATION ON THE VARIANT READINGS IN THE PURĀṆIC TEXTS AND THEIR IMPORTS FOR THE CRITICAL EDITIONS

DR. GIORGIO BONAZZOLI

पुराणेषु पाठपरम्पराक्रमजन्या लेखकप्रमादजन्याश्च बहवो दोषा दृश्यन्ते। तेषां दोषाणां निरासायेदमावश्यकं यत् पाठसमीक्षासिद्धान्तानामुपयोगः प्राचीनतम-पाठनिर्धारणाय भवेत्। एषां सिद्धान्तानामुपयोगः पुराणेतरग्रन्थानां संपादने प्रयुज्यत एव। अत्र लेखकमहोदयेन प्रतिपादितं यत् पुराणेषु यानि बहूनि पाठान्तराणि पाठपरम्पराक्रमजन्यानि लेखकप्रमादजन्यानि वा न वर्त्तन्ते, तादृशानि पाठान्तराणि मुख्यतया त्रिप्रकारकाणि वर्त्तन्ते—

१. अक्षराणां शब्दानां स्वेच्छया परिवर्त्तनम्

२. अतिरिक्तसंनिवेशो पाठलोपो वा तत्र पाठलोपो क्वचिद् भ्रमजन्यो, क्वचिच्च दृष्टिसञ्चारजन्यो वा भवति। अतिरिक्तसंनिवेशः प्रायशो भ्रमजन्यो न भवति, स चोद्देश्यविशेषेण सन्निवेश्यत इति।

३. कथाभागे परिवर्त्तनम्, एतत् परिवर्त्तनं क्रमपरिवर्त्तनार्थं, संक्षेपार्थं, विस्तारार्थं वा क्रियते। क्रमपरिवर्त्तनं च स्वरूपपरिवर्त्तनार्थं क्रियते।

पुराणेतिहासयोरुपलब्धानामेषां त्रयाणां पाठान्तरसम्बन्धिभेदानां संपादनाय प्रचलितपाठसमीक्षासिद्धान्तातिरिक्तानामन्येषां सिद्धान्तानामन्वेषणं तत्प्रयोगश्च आवश्यक इति लेखकेन प्रतिपादितम्।

## भागवतमहापुराणम्-मूलभागवतपुराणस्योपबृंहणम्

## THE BHGĀAVATA MAHĀPURĀṆA-AN ENLARGEMENT OF UR-BHĀGAVATA

DR. MAHESHWARI PRASAD

अत्र लेखकेन विवेचितं यत् संप्रत्युपलब्धं श्रीमद्भागवतमहापुराणं कस्यचित्संक्षिप्तमूलभागवतमहापुराणस्योपबृंहितं रूपमस्ति। एतत्प्रतिपादनाय लेखकेन श्रीमद्भागवतमहापुराणस्य केषाञ्चिदंशानां तुलना श्रीमद्देवीभागवत-महापुराणस्योपलब्धैरंशैः कृता। देवीभागवतपुराणे उपलब्धे अंशे अस्य प्राचीनतरं रूपं दृश्यते। श्रीमद्भागवतमहापुराणे तेषां तेषामंशानांमुपबृंहणं परिवर्त्तनं च तत्तद्रूपेण विशेषशैल्या च प्राप्यते। एतत्प्रसङ्गे लेखकेन द्वयोः टीकाकारयोः श्रीधरस्वामिविजयध्वजयोश्च कृतदशमस्कन्धीयटीकाभागयोः तुलनापि विहिता यदाधारेणैतत्प्रतीयते यत् समुपलब्धस्य श्रीमद्भागतमहापुराणस्य प्राचीनरूपं संक्षिप्तमासीदिति, काले काले तस्य विस्तरेण परिवर्त्तनेन च रूपमुपबृंहितं जातम्।

# गरुडपुराणस्य प्रेतकल्पः (विविधपाठसंप्रदायानां प्रारम्भिकं विवेचनम्)

## THE PRETAKALPA OF THE GARUḌA PURĀṆA (A PRELIMINARY REPORT OF THE DIFFERENT VERSIONS)

DR. GIORGIO BONAZZOLI

गरुडपुराणान्तर्गतप्रेतकल्पस्य बहवः पाठसम्प्रदायाः प्राप्यन्ते। अतः गरुडपुराणस्य प्रेतकल्पीयपाठसमीक्षितसंस्करणस्य पाठसंपादनार्थमिदमावश्कं यदेतेषां पाठसंप्रदायानां पारस्परिकसम्बन्धस्याध्ययनं विधाय यथासंभवं सर्वेषां समाहारः एकस्मिन् द्वयोर्वा पाठसंप्रदाये भवेत्। संप्रति प्रायेण प्रेतकल्पस्य पञ्चदश पाठसम्प्रदायाः प्राप्यन्ते यथा ४९, ४५, ४०, ३७, ३५, ३४, ३२, ३०, २७, २४, १८, १४, १३, १० अध्यायात्मकाश्च।

एभ्यो संप्रदायेभ्योऽतिरिक्तं झुनझुणू (राजस्थान) वासिनो नवनिधिरामस्य षोडशाध्यायात्मकः सारोद्धारनामको ग्रन्थोऽपि प्राप्यते। एष नवनिधिरामः अष्टादशशताब्द्यां शार्दूलनृपे राज्यं शासति वर्त्तमान आसीत्। मृत्यूपरान्ते अस्यैव सारोद्धारस्य पठनपरम्परेदानीं दृश्यते।

अस्मिन् निबन्धे उपलब्धेषु एषु पाठसंप्रदायेषु केषाञ्चित् पाठसंप्रदायानां पारस्परिकः सम्बन्धो लेखकेन विचारितः—

१. वेङ्कटेश्वर-वङ्गवासि-जीवानन्दाभ्यां प्रकाशितानां मुद्रितसंस्करणानां सम्बन्धः।

२. वेङ्कटेश्वर संस्करणस्य ११–४९ पर्यन्तानामध्यायानां जीवानन्दसंस्करणस्य १–३५ पर्यन्तानामध्यायानां च संबन्धः।

३. वेङ्कटेश्वर संस्करणस्य १–१० पर्यान्तानामध्यानां तथा तस्यैव ११–४९ पर्यन्तानामध्यायानां परस्परं संबन्धः।

४. गङ्गानाथ झा संस्थानस्य ३० अध्यायात्मकस्य ८२६।५०१० संख्याकस्य हस्तलेखस्य तथा मथुरानगर्याः १८८४ वर्षे प्रकाशित ३४ अध्यायात्मकस्य संस्करणस्य तथा ३५ अध्यायात्मकस्य जीवानन्दसंस्करणस्य परस्परं सम्बन्धः।

५. १८ अध्यायात्मकस्य अड्यार संस्थानस्य टी० आर ७७७ संख्याकस्य हस्तलेखस्य जीवानन्दसंस्करणस्य च सम्बन्धः।

६. दशाध्यायात्मकः पाठ ।

७. नवनिधिरामकृतः सारोद्धारः ।

एषां सम्बन्धानामध्ययनेन प्रतीयते यदिमे सर्वे पाठसम्प्रदायाः ३२, वा ३५, अध्यात्मकस्य पाठस्योपजीविन इति । अनेन सम्प्रदायेन १० अध्यायात्मकः षोडशाध्यायात्मको वा पाठः आंशिकरूपेण पृथगेवास्तीति—

# नरकविषये शंकराचार्येण कृतः पौराणिकमतोल्लेखः किं समीचीनम् ?

## IS ŚANKARA'S ASSERTION OF THF PURĀṆIC VIEW ABOUT NARAKA VALID ?

DR. RAM SHANKAR BHATTACHARYA

अपि च सप्त (३.१.१५) इति ब्रह्मसूत्रव्याख्यानावसरे शंकराचार्येण भणितं—अपि च सप्त नरका रौरवप्रमुखा दुष्कृतफलोपभोगभूमित्वेन स्मर्यन्ते पौराणिकैः ।

वर्तमानपुराणानामध्ययनेन प्रतीयते यत् शंकराचार्यस्य कथनं पूर्णरूपेण यथार्थभूतं न वर्तते । अत्र लेखकेन सर्वेषां पुराणानां केषाञ्चिदुपपुराणानाञ्च नरकसंबन्धिविरणस्याध्ययनं विधाय प्रतिपादितं यत्पुराणेषु नरकसंख्या विभिन्ना वर्तते । एषा संख्या एकविंशतिरष्टाविंशतिर्वा प्रामुख्येन वर्तते । तेषां सप्त संख्या केवलं मार्कण्येय-वायु-ब्रह्माण्डपुराणेष्वेवोपलभ्यते । विष्णुपुराणे (१.५.४१) सप्तनरकाणां नाम वर्तते किन्तु तत्र सप्त इति संख्या न दत्ता । पौराणिकपाठैः सह शंकराचार्यमतस्य तुलनया अधोनिर्दिष्टानि तथ्यानि स्फुटीभवन्ति :

१. पुराणेषु नरकाणां संख्या एकविंशतिरष्टाविंशतिर्वा प्राप्यते इति अनेन शंकराचार्योऽपरिचित आसीत् ।

२. मार्कण्डेयपुराणे सप्त संख्या न दत्ता वर्तते अतः इदं संदिग्धं यत् शंकराचार्यस्य मतं मार्कण्डेयानुसारि ।

३. इदमपि सुस्पष्टं यत् शंकराचार्यस्य मतं विष्णुपुराणाश्रितं नास्ति ।

४. वायुब्रह्माण्डपुराणयोर्वर्णनमाधारीकृत्वैव शंकराचार्यस्यैतत्सूत्रव्याख्याने नरकसंख्यावर्णनम् ।

## मगपुरोहितास्तेषां सूर्योपासनायां प्रभावश्च

## THE MAGIAN PRIESTS AND THEIR IMPACT ON SUN WORSHIP

DR. C. D. PANDEYA

मगाः सूर्योपासका अग्न्युपासकाश्च पुरोहिता आसन्। महाभारतविष्णुपुराणसाम्बपुराणादीनामाधारेणेदं ज्ञायते यत् ते शाकद्वीपाद् जम्बुद्वीपमानीताः। मगैः सूर्योपासना विशेषरूपेण प्रभाविता जाता विशेषतो मन्दिरेषु मूर्तिनिर्माणेषु च। ख्रिष्ट्रीयषष्ठशताब्दीं यावत् ते हिन्दूसमाजस्य अङ्गभूता संवृत्ताः शासकैश्च संरक्षिताः।

## पैजवनः पैलवको वा शूद्रयोगी

## PAIJAVANA OR PAILAVAKA : A ŚŪDRA YOGIN

Dr. JYOTIRMAYEE BHATTACHARYA (MISRA)

अत्र लेखिकया विष्णुधर्मपुराणस्य एकस्य श्लोकस्य हठयोगप्रदीपिकाग्रन्थस्य (४.१५) ज्योत्स्नाटीकायामुपलब्धस्य पाठस्य विवेचनं प्रस्तुतम्। अस्मिन् पद्ये पैलवकनामकः एकः शूद्रयोगी वर्णितो वर्तते। पुराणेषु एतादृशं नाम न प्राप्यते किन्तु स्कन्दपुराणीये नागरखण्डे शान्तिपर्वणि च पैजवन नामको शूद्रयोगी प्राप्यते। लेखिकामहोदयाया मतानुसारं मूलपाठः पैजवन इत्यासीत् यस्य परिवर्तनं पैलवकरूपेण कृतः।

# सर्वभारतीयकाशिराजन्यासस्य कार्यविवरणम्

( जनवरी-जून १९८४ )

## गरुडपुराणकार्यम्

गरुडपुराणस्याचारकाण्डस्य पाठसंवादलेखनकार्यं प्रचलति। अद्यावधि सप्त देवनागरीहस्तलेखानां द्वयोर्नेवारीलिपिहस्तलेखयोश्च पाठसंवादकार्यं पूर्णतां गतम्। द्वयोर्नेवारीहस्तलेखयोर्द्वयोर्वङ्गलिपिहस्तलेखयोश्च संवादकार्यं प्रचलति। उत्कललिपि-हस्तलेखस्यान्वेषणं क्रियते। शारदालिप्यां एको हस्तलेखः काश्यां हिन्दुविश्वविद्यालये वर्तते यस्य जेराक्सप्रतेः प्राप्तये प्रयत्नः क्रियते। डा० जोर्जो वोनाजुलीमहाशयस्य दक्षिणभारतयात्रया इदं ज्ञातं यद् दक्षिणभारतस्य कस्मिंश्चिदपि विख्याते ग्रन्था-गारे आचारकाण्डस्य हस्तलेखो न विद्यते। तेन महाशयेन इमे ग्रन्थागारा विलोकिताः गवर्नमेण्ट ओरिण्टल मैनुस्क्रिप्ट लाइब्रेरी, मद्रास; अड्यार लाइब्रेरी मद्रास; कुप्पुस्वामी रिसर्च इन्स्टीच्यूट, मद्रास; फ्रेन्चइन्स्टीच्यूट, पाण्डिचेरि; महाराज सर्फोजीज सरस्वती महल लाइब्रेरी, तञ्जाऊर; श्रीरङ्गनाथ स्वामी देवस्थानम्, श्रीरङ्गम् त्रिचिरापल्ली; ओरियण्टल रिसर्च इन्स्टीच्यूट एण्ड मैनुस्किप्ट्स लाइब्रेरो, ट्रिवेड्रम्; संस्कृत कालेज त्रिपुनीत्तूर कोचीन; कालीकट विश्वविद्यालय; ओरियण्टल रिसर्च इन्स्टीच्यूट, मैसूर; पेजावर मठ, उडुपी; श्रीवेङ्कटेश्वर ओरियण्टल रिसर्च इन्स्टीच्यूट, तिरुपति; केन्द्रीय संस्कृत विद्यापीठ, तिरुपति। एषु कुत्रापि आचारकाण्डस्य हस्तलेखो नास्ति केवलं गवर्नमेण्ट ओरियण्टल मैनुस्क्रिप्ट्स लाइब्रेरी स्थाने तेलगुलिप्यां लिखितः एकोनविंशशताब्दयाः एको हस्तलेखो वर्तते। एष हस्तलेखोऽपूर्णो वर्तते तथा जीवानन्दसंस्करणेन सह साम्यं भजते। एष हस्तलेखः प्रारम्भतः ६९ अध्यायस्य चतुर्थश्लोकं यावद् लिखितो वर्तते।

२. हस्तलेखेषु विविधसम्प्रदायानामवस्थित्या प्रेतकल्पस्य अध्ययनं क्रियते अस्याध्ययनस्य फलमस्मिन्नेव अङ्के ( १५८-१९५ पृष्ठेषु ) प्रदत्तमस्ति लेखरूपेण। अद्यावधि षण्णां हस्तलेखानां पाठसंवादः कृतः।

३. अद्य यावद् ब्रह्मकाण्डस्य चतुर्णां हस्तलेखानां पाठसंवादः कृतो वर्तते। इमे सर्वे हस्तलेखा देवनागरीलिप्यां वर्तन्ते। दक्षिणभारतग्रन्थालयेषु दश हस्त-लेखा वर्तन्ते येषु पञ्च पूर्णाः पञ्च च अपूर्णा वर्तन्ते। एषु हस्तलेखेषु द्वौ हस्तलेखौ तेलगुलिप्यां षट् हस्तलेखा नन्दिनागरीलिप्यां द्वौ च देवनागरीलिप्यां वर्तन्ते।

## शिवधर्मपुराणस्य शिवधर्मोत्तरपुराणस्य च कार्यम्

शिवधर्मोत्तरपुराणस्याधारपाठलेखनकार्यं पूर्णं जातम्। एष आधारपाठः लण्डननगरस्थस्य 'वेलकम्' इति संस्थानतः प्राप्तस्य माइक्रोफिल्मप्रतेः आधारेण लिखितः। एषा माइक्रोफिल्मप्रतिः एकस्य प्राचीनवर्तुलनेवारीलिप्यां लिखितस्य हस्तलेखस्यास्ति। द्वौ अपरौ हस्तलेखौ तञ्जाउर नगरे स्थितात् सरस्वतीमहलपुस्तकालयात् प्राप्तौ ययोः पाठसंवादकार्यं करणीयमस्ति।

## मानसखण्डकार्यम्

स्कन्दपुराणान्तर्गतस्य मानसखण्डस्य प्रकाशनं विगते 'जनवरी' मासस्याङ्के ( XXVI. 1 ) प्रारब्धम्। तत्र आदितो दश अध्यायाः प्रकाशिताः। इदं संस्करणम् अस्माकं पुस्तकालये प्राप्तस्यैकहस्तलेखस्याधारेण आसीत्। इदानीं नेपाल-देशान्तर्गतकाठमाण्डूनगरे स्थितस्य राष्ट्रीयाभिलेखागारस्य द्वौ देवनागरीलिपि-हस्तलेखौ प्राप्तौ। तयोरुपयोगोऽपि अस्य खण्डस्य सम्पादने भविष्यति।

## वेदपारायणम्

विगते माघमासे शुक्लपक्षस्य प्रतिपत्तिथिमारभ्य पूर्णिमातिथिपर्यन्तं कृष्णयजुर्वेदस्य संहिताब्राह्मणारण्यकोपनिषदां पारायणं रामनगरदुर्गस्थिते व्यासेश्वरमन्दिरे श्रीवीरेश्वरद्राविडमहोदयेन कृतम्। श्रीवरदराजघनपाठी श्रोता आसीत्। पारायणसमाप्तौ पारायणकर्त्रे श्रोतृमहोदयाय च नियता दक्षिणा प्रदत्ता।

## पुराणपाठः

रामनगरस्थे जनकपुरमन्दिरे चैत्रशुक्लप्रतिपत्तिथिमारभ्य नवमीं तिथिं यावद् अध्यात्मरामायणस्य पारायणं श्रीरामजोमिश्रमहोदयेन कृतम्।

## पुराणविभागे आगता विद्वांसः

१. डा० एवर्ट कजिनमहोदयः फोर्डम विश्वविश्वविद्यालय, न्यूयार्क इत्य-त्रत्यः प्राध्यायपकः। एष महाशयः विश्वाध्यात्मिकता (World spirituality) इति नाम्नः विश्वकोषस्य प्रधानसंपादकः। एष महोदयः १३ जनवरी १९८४ दिनाङ्के पुराणविभागं न्यासस्याध्यक्षान् तत्र भवतः काशिनरेशांश्च दृष्टवान्। पुराणविगास्य दर्शकपुस्तके लिखति—तत्र भवतां महाराजानां प्रासादस्य च दर्शनं तथा पाठसमीक्षात्मकसंस्करणविषये महत्त्वपूर्णस्य च कार्यस्यावलोकनं आनन्दस्य सम्मानस्य च विषय आसीत्।

२. ट्रावनकोर नरेशस्तत्रभवान् महाराजः रामवर्मा १२-३-८४ दिनाङ्के पुराणविभागं दृष्टवान्। एष दर्शकपुस्तिकायां लिखति—तत्र भवतां काशिराजानां

संरक्षणे निर्देशने च पुराणप्रकाशनन्यासेन क्रियमाणं कार्यं ज्ञात्वा अतीव प्रभावितोऽस्मि। संस्कृतेः पुनरुद्धारस्यैतत् कार्यम् वृद्धिमियादिति कामये।

३. टोरण्टो विश्वविद्यालय, कनाडा, इत्यत्रत्यः प्राध्यापकः डा० ए. के. वार्डरमहोदयः। एष महाशयः भारतीयकाव्यसाहित्यविषयकस्य ग्रन्थस्य प्रणेता। एष महोदयः २० मार्च १९८४ दिनाङ्के काशिकहिन्दुविश्वविद्यालयस्य प्राध्यापकेन डा० रेवाप्रसादद्विवेदिमहोदयेन सह पुराणविभागम् आगतः। सः लिखति—अत्र वाराणस्यां सक्रियरूपेण क्रियमाणस्य पुराणानां पाठसमीक्षासम्बन्धिकार्यस्यावलोकनेनातीव हर्षितोऽस्मि। अस्य कार्यस्याहं बहुवर्षेभ्यः अतीवौत्सुक्येन प्रतीक्षणमकार्षम्। ममाकांक्षाऽस्ति यद् एतादृशबृहत्कार्यनिमित्तमधिकानां विदुषामावश्यकता वर्तते येन वै कार्यं शीघ्रतया समाप्तिमियाद् येन भारतीयपरम्परायाः सर्वेभ्यो रसिकेभ्यः सुलभं भूयात्। अहमिदमपि विश्वसिमि यद् एषा योजना पाठसमीक्षाया वैज्ञानिकपद्धत्या एव प्रचलिष्यति तथा तेषां विदुषां विरोधस्य ध्यानं न करिष्यति ये समये समये अनेन आधारेणास्य विरोधं कुर्वन्ति यद् अनया पद्धत्या तेषां ज्ञातः प्राचीनपाठः परिवर्तितो भविष्यति। अस्याः पद्धत्या उद्देश्यं संभावितस्य प्राचीनतमस्य पाठस्य संरक्षणं तथा परवर्तिपाठस्य प्रदर्शनमस्ति। अस्मिन् कार्ये कस्यापि विरोधो न भवितुमर्हति यतो निर्धारितपाठाधारेणाध्ययनस्य सर्वाण्यङ्गानि उपकृतानि भविष्यन्ति। अस्यां योजनायां कार्यकर्तृभ्यः साफल्यं कामये येन पुराणानां पाठसमीक्षितसंस्करणमस्यमभ्यः सुलभं भवेत्।

४. वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य कुलपतिः डा० रामकरणशर्मा ५-६-८४ दिनाङ्के तत्रभवतः काशिनरेशान् डा० विभूतिनारायण सिंह महोदयान् दृष्टवान् पुराणविभागस्य चावलोकनं कृतवान्। स लिखति—

श्री काशिराजन्यासपरिचालितः पुराणविभाग एष हरति मनांसि मनस्विनाम्। 'इतिहासपुराणाभ्यां वेदार्थमुपबृंहये' दिति सर्वेपि वयं स्वीकुर्मः। तथापि नान्यत्र कुत्रचिदपि सर्वाङ्गीणमध्ययनं पुराणविद्यायास्तथा व्यवस्थापितं दृश्यते यथा श्रीकाशिराजाधिष्ठितेऽस्मिन् पुराणविभागे। जयति श्रीकाशिराजः। जयति च स्फीतायतिरेष पुराणविभागः।

## नन्देश्वरभवने राष्ट्रपतेः स्वागतम्

२५ मई १९८४ दिनाङ्के तत्रभवता काशिनरेशेन महाराजेन डा० विभूतिनारायणसिंहमहोदयेन भारतस्य महामहिमराष्ट्रपतेः ज्ञानी जैलसिंहमहोदयस्य स्वागतं कृतम्। राष्ट्रपतेः स्वागते अल्पाहारस्य व्यवस्थाऽऽसीत् यस्मिन् नगरस्य विशिष्टा नागरिका, विश्वविद्यालयानां कुलपतयः, जनपदस्याधिकारणः, केन्द्रीय मंत्री

श्रीकल्पनाथ रायः, राज्यसभाया उपसभापतिः श्रीश्यामलाल यादवः,स्थानीयगोरखा रेजिमेण्ट इत्यस्याधिकारी, कांग्रेस संस्थायाः कार्यकार्याध्यक्षः पं० कमलापतित्रिपाठि-महोदयः तथा सर्वभारतीयकाशिराजन्यासस्य न्यासधारिणौ पं० बलदेव उपाध्यायः डा० रघुनाथसिंहमहोदयश्च उपस्थिता आसन् । तत्रभवान् काशिनरेशः महाराजो डा० विभूतिनारायणसिंहमहोदयः उपस्थितजनानां परिचयं राष्ट्रपतिमहोदयाय प्रदत्तवान् ।

अस्मिन् अवसरे तत्र भवता काशिनरेशेन महामहिमराष्ट्रपतिमहोदयः सर्वभारतीयकाशिराजन्यासस्य पुराणप्रकाशनविषये परिचायितः । महाराजैः राष्ट्रपतिमहोदयाय वामनपुराणस्य हिन्द्यनुवादः पुराणपत्रिकायाः रजतजयन्त्य-ङ्कश्च प्रदत्तः । राष्ट्रपतिमहोदयः प्रकाशनैः अत्यन्तप्रभावित आसीत् । तेन कथितं यत् स इमान् ग्रन्थान् पठिष्यति । राष्ट्रपतिमहोदयः २४-२५ मई दिनाङ्कयोः वाराणस्यामवात्सीत् । तेनात्र विविधतीर्थस्थलानां दर्शनं कृतम् ।

### महाराजकुमारस्य समावर्तनसंस्कारः

अप्रैलमासे चिरंजीविनो महाराजकुमारस्य समावर्तनसंस्कारः सम्पन्नः । उपनयनान्तरं महाराजकुमारो ब्रह्मचर्याश्रमं प्रविश्य वेदाध्ययनम् सम्पादितवान् । सम्प्रति ब्रह्मचर्याश्रमतः तेषां समावर्तनम् सम्पन्नम् । समावर्तनसंस्कारावसरे दिनत्रयं यावत् संस्कारकृत्यानि संपादितानि ब्रह्मणाश्च भोजिताः । वयं महाराज-कुमारस्य जीवनसाफल्याय कामयामहे ।

# सहयोगिन्यासानां कार्यविवरणम्

## १. महाराज बनारस विद्यामन्दिर न्यासः

### वसन्तमङ्गलोत्सवः

प्रति वर्षमेष उत्सवः दिनत्रयं वसन्ते संपाद्यते । वसन्ते संपाद्यमान-त्वादस्य वसन्तमङ्गलोत्सव इति नाम । अयमुत्सवः सायंकाले संपाद्यते यस्मिन् काशिकहिन्दूविश्वविद्यालयस्थस्य संगीतमहाविद्यालयस्य छात्राः स्वविद्यायाः प्रदर्शनं कुर्वन्ति । विद्यामन्दिरन्यासस्याध्यक्षास्तत्र भवन्तः काशिनरेशा डा० विभूतिनारायणसिंहमहोदयाः प्रतिदिनमस्मिन् उत्सवे सम्मिलिता भवन्ति । तैः सह महाराजकुमारो महाराजकुमार्यः विशिष्टनागरिकाश्च गानविद्यां श्रृण्वन्ति । उत्सवे सम्मिलितेभ्यः सर्वेभ्यः कलाकारेभ्यः प्रतिदिनं सायंसमये भोजनं प्रदत्तम् ।

## संग्रहालयः

सर्वे तीर्थयात्रिणः पयटंकाश्च ये वाराणस्यामहोरात्रं तिष्ठन्ति रामनगर-दुर्गस्थस्य संग्रहालयस्यावश्यमेवावेक्षणं कुर्वन्ति। संग्रहालये शिविकाः, शस्त्राणि, वस्त्राणि, हस्तिदन्तनिर्मितवस्तूनि अन्यानि च बहूनि रुचिकराणि वस्तूनि सन्ति येषां प्रशंसनं दर्शकाः कुर्वन्ति विशिष्टदर्शकेषु अधोनिर्दिष्टा दर्शका दर्शकपुस्तके स्वाभिप्रायाणि इत्थं लिखितवन्तः।

१. माउङ्ग नूः ९-१-८४ दिनाङ्के–अहं मम परिवारश्च संग्रहालयं दृष्टवन्तः अस्माभिः बहूनि आनन्दजनकानि वस्तूनि दृष्टानि! अहं अस्य दर्शनार्थं पुनरागमिष्यामि।

२. श्रीनारायणमेननमहोदयः, दिल्ली नगरस्थिताया संगीत नाटक अकादमी संस्थाया अध्यक्षः १-३-८४ दिनाङ्के—अयं संग्रहालयः आश्चर्यकरः रुचिकरश्च यत्र विविधरुचीनां वस्तूनि। अनेन महतो संग्रहकारकस्य महत्याः रुचेरुदारतायाश्च परिचयः प्राप्यते।

३. ट्रावनकोरनरेशो महाराजरामवर्मा–१२-३-८४ दिनाङ्के इदं संस्थानमस्माभिर्दृष्टं तदेतदतीव रुचिकरं प्रशंसार्हं च। अहं तत्र भवन्तं काशिनरेशं प्रति अस्य ऐतिहासिक-सांस्कृतिक-महत्त्वमयस्य अद्वितीयसंग्रहालस्य निर्माण-निमित्तं धन्यवादज्ञापने आत्यन्तिकीं प्रसन्नतामनुभवामि।

## संग्रहालयस्य चारुप्रस्तरनिर्मितः कच्छपः

महाराजविद्यामंदिर संग्रहालयस्य चारुप्रस्तरनिर्मितः कच्छपः उत्कीर्ण-कलायारचारुद्रव्यैः खचितकलायाश्च शोभनमुदाहरणमस्ति। भारतीयशासनेन ब्रिटिशशासनेन च 'भारतस्योत्सवाः' इति नाम्ना संयोजितप्रदर्शनै 'अदिति-प्रदर्शन' इत्यस्य प्रधानपरामर्शदात्रा श्रीराजीवसेठीमहोदयेन प्रदर्शनार्थमेष कच्छपश्चयितः। इदं प्रदर्शनं मनुष्यजीवने निर्माणस्यानन्दं प्रदर्शयितु-मैच्छत्। प्रदर्शनमिदं लण्डननगरे 'वार्विकन सेण्टर' इति स्थाने जुलाई-अगस्त १९८२ इति समये संपन्नम्। उत्सवस्य विषयः भारतीयकलायाः सर्वोत्कृष्टत्व-प्रदर्शनमेवासीत्।

भारतीयमहोत्सवस्य समाप्तौ अयं कच्छपः सुरक्षितरूपेण तदधिकारिभिः संग्रहालये प्रत्यावर्त्तितः।

## ध्रुपदमेला

विगतदशवर्षेभ्यः वाराणस्यां तुलसीघट्टे प्रतिवर्षं महाराजबनारस विद्यामन्दिर न्यासेन ध्रुपदमेलाया आयोजनं क्रियते। अस्योत्सवस्यायं दशमो वर्षं आसीदिति

हेतोः विशेषैण संभारेणायमायोजितः । इदमायोजनं गङ्गाघट्टे निरावृतप्रदेशे रात्रित्रयं यावत् संपाद्यते । शिवरात्रेः प्राक् दिनद्वयमारभ्य शिवरात्रौ समाप्यते । अत्रायोजने गानश्रवणार्थं सहस्रशः श्रोतारः समागच्छन्ति, यत्र बहवो वैदेशिका अपि समागत्य अत्युत्साहेन गानश्रवणं कुर्वन्ति । इदमायोजनं शुल्कमुक्तं भवति, श्रोतृणां सामान्या धारणास्ति यदिदमायोजनमन्यैस्तैस्तैरायोजनैः साम्यतां भजते येषु महत् शुल्कं श्रोतृभ्यः गृह्यते । 'अखाडा तुलसीदास' इति नाम्नः स्थानस्य महान्तः प्रो. वीरभद्रमिश्रः आयोजनसाफल्याय सर्वथा प्रयतते ।

अस्मिन् वर्षे फरवरी मासस्य २७, २८, २९ दिनाङ्कानां रात्रिषु ध्रुपदमेला संपन्ना । २७ फरवरी दिनाङ्कदिने रात्र्यागमे प्रथमवारं महाराजकुमारेण श्री अनन्त नारायण सिंहमहोदयेन 'ध्रुपदमेला' इत्यस्य उद्घाटनं कृतम् । स्वोद्घाटनभाषणे महाराजकुमारो अस्यायोजनस्यैतिह्यं भणितवान् । अस्मिन् कार्ये शासनद्वारा अन्यसंस्थाभिश्च देशस्य विविधस्थानेषु ध्रुपदगायन कार्यक्रम-स्यायोजनस्य प्रयासस्यापि वर्णनं कृतं महाराजकुमारेण । महाराजकुमारः ध्रुपदमेलानिमित्तं स्वशुभकामनां व्यक्तवान् तथा ध्रुपदगानस्य शुभभविष्यार्थं कामयामास । अस्मिन् उद्घाटनावसरे कांग्रेस संस्थाया राष्ट्रीय कार्यकार्यध्यक्षः पण्डितकमलापतित्रिपाठिमहोदयो मुख्यातिथिरध्यक्षश्चासीत् । पण्डितत्रिपाठि-महोदयेन काशिराजवंशेन भारतीयसंस्कृतेः कलायाश्च रक्षणार्थं प्रचारार्थं च कृतानां प्रयासानां प्रशंसनं कृतम् । ध्रुपदमेलाया दशमोत्सवनिमित्तं भारतशासनस्य अतिरिक्तसचिवपदे वर्तमाना डा० श्रीमती कपिलावात्स्यायनमहोदया, भारत-शासनस्य सङ्गीतनाटक अकादमी इति संस्थाया अध्यक्ष; डा० नारायण मेनन महोदय अपि आहूतौ आस्ताम् । ताभ्यामस्यायोजनस्य प्रशंसनं कृतम् । अस्मिन् उत्सवे उद्घोषितं यत् त्रिसहस्ररूप्यकाणां त्रयः पुरस्काराः प्रतिवर्षं ध्रुपदशैल्याः त्रिविशिष्टकलाकारेभ्यः प्रदास्यन्ते । एषु पुरस्कारेषु द्वौ पुरस्कारौ गायनकलायां एकश्च वाद्यकलायां भविष्यति । अस्मिन् वर्षे एक एव पुरस्कारः पण्डित सियारामतिवारीमहोदयाय प्रदत्तः ।

अस्मिन् अवसरे हिन्दू विश्वविद्यालयस्य संगीतमहाविद्यालये एका विचार-गोष्ठी अपि आयोजिता आसीत् यस्या उद्घाटनं तत्रभवद्भिः काशिनरेशैः महाराज डा० विभूतिनारायणसिंहमहोदयैः कृतम् । गोष्ठ्यां डा० श्रीमती कपिलावात्स्यायन महोदया, डा० नारायणमेनन महोदयश्च सम्मिलितौ आस्ताम् । गोष्ठ्याः संचालनं डा० प्रेमलताशर्मा कृतवती । गोष्ठ्याः साफल्यार्थं डा० श्रीमती राजम् महोदया अपेक्षितं साहाय्यं दत्तवती ।

## २. महाराज उदितनारायणसिंह मानसप्रचार निधिः

अस्य न्यासस्य तत्त्वावधाने वैशाखमासे शुक्लपक्षे प्रतिपत्तिथिमारभ्य नवमीं तिथिं यावत् पूर्ववद् रामचरितमानस्य नवाह्नपारायणं चकियानगरस्थिते

सरस्वतीमन्दिरे संपन्नम्। पारायणं मन्दिरस्य पूजकेन कृतम्। प्रवचनं तु श्रीशिवनारायणव्यासमहोदयेन, रामप्रसादअवस्थीमहोदयेन, सन्तकुमारमहोदयेन तथा श्रीवैष्णव महोदयेन कृतम्। प्रवचनानि कालीमन्दिरे संपन्नानि। न्यासस्याध्यक्षास्तत्रभवन्तः काशिनरेशा महाराजा डा० विभूतिनारायणसिंह महोदया प्रतिदिनं नवाह्नपारायणे उपस्थिता आसन्। पारायणसमाप्तौ ब्राह्मणेभ्यः भोजनं दक्षिणाश्च प्रदत्ताः।

## ३. महाराज काशिनरेश धर्मकार्य निधिः

अनेन न्यासेन वर्षं यावद् बहूनि धार्मिकाणि कृत्यानि संपाद्यन्ते। अनेन न्यासेन त्रयो महाविद्यालया अपि संचाल्यन्ते येषामनुदिनं उन्नतिर्भवति। इमे अधोनिर्दिष्टा महाविद्यालया सन्ति—महाराज वलवन्तसिंह महाविद्यालयः गङ्गापुरस्थः, २. महाराजा मनसाराम विधिमहाविद्यालयः राजातालाब नगर-स्थितः ३. रामनगर दुर्गस्थिता महारानी रामरत्नकुंवरि संस्कृत पाठशाला च।

# ११

मान्धातुश्चरितं पुण्यं श्रुत्वा काशिपतिस्तदा ।
पप्रच्छ तमृषिं भूयः संपूज्य च पुनः पुनः ॥ १ ॥

धन्वन्तरिरुवाच ।

यथा प्रकाशितो योगिन् मानसाख्यः सरोवरः ।
तथा त्वया समुदितं विस्तरेण न संशयः ॥ २ ॥

अधुना श्रोतुमिच्छामि मानसाख्यस्य वर्णनम् ।
तत्तीर्थानां च माहात्म्यं देवर्षिगणपूजितम् ॥ ३ ॥

सरोवरं प्रयास्यामि माहात्म्यं शृणुयाम्यहम् ।
कस्मात् प्रवेशो योगीश निर्गमः कुत्रतः स्मृतः ॥ ४ ॥

के तीर्थागमने तत्र निर्गमे के त्वया स्मृताः ।
अगम्यरूपो हि गिरिर्हिमेनेति मया श्रुतम् ॥ ५ ॥

विलङ्घ्य गिरिराजानं प्राप्यते मानसः कथम् ।
एतद्धि संशयं योगिन् छिन्धि मे नात्र संशयः ॥ ६ ॥

व्यास उवाच ।

इति तद्वचनं श्रुत्वा चिरं ध्यात्वा तदा मुनिः ।
उवाच वचनं श्रेष्ठं पुण्याख्यानसमन्वितम् ॥ ७ ॥

दत्त उवाच ।

शृणु राजन् मया प्रोक्तं धर्मकामार्थदं शुभम् ।
आयुरारोग्यदातारं धनधान्यविवर्द्धनम् ॥ ८ ॥

आख्यानं गिरिराजस्य देवतैरपि पूजितम् ।
हिमस्य गुणसंयुक्तं पुण्यमूलं तपोनिधिम् ॥ ९ ॥

---

११

१. –b) ने1 तथा (→तदा). ४. –a) ने1 सरोवरजलस्यापि, ने2 सरोवरं प्रजास्यामि. ५. –b) ने2 नो (→के).

९. –a) ने1 आख्यान–(→आख्यानं). –d) ने3 °मूल–(→°मूलं).

यथोक्तं हि त्वया राजंस्तत्तथैव न संशयः ।
अगम्यरूपो हि गिरिर्वर्त्तते नृपसत्तम ॥ १० ॥
तथापि मानुषाणां वै धर्ममार्गरतात्मनाम् ।
कैलासमपि दुर्गम्यो गम्यरूपो हि विद्यते ॥ ११ ॥

सन्ति सर्वे महाराज दुर्विलङ्घ्या हि पर्वताः ।
हिमाद्रिस्तु स्वभावेन दुर्विलङ्घ्यो न संशयः ॥ १२ ॥

तथापि कथयिष्यामि तस्य मार्गं न संशयः ।
यं प्राप्य मृगकीटाद्या व्रजन्ति शिवमन्दिरम् ॥ १३ ॥

अस्त्युत्तरपथे राजन् हिमाद्रिः पर्वतोत्तमः ।
तस्य पादतले रम्यो नाम्ना कूर्माचलो गिरिः ॥ १४ ॥

तीर्थैर्बहुभि[ : ]संयुक्तो मृगपक्षिभिः सेवितः ।
गन्तव्यं तत्र राजर्षे यत्र कूर्माचलो गिरिः ॥ १५ ॥

मयूरैः सेवितपदस्तथान्यैः पक्षिराजितः ।
गण्डकीलोहसरितोर्मध्ये स्नात्वा महेश्वरम् ॥ १६ ॥

संपूज्य नृपशार्दूलस्तथान्यान् देवतागणान् ।
ततस्तु सरयूतीरे दृष्ट्वा तत्र शिलां शुभाम् ॥ १७ ॥

स्नात्वा तत्र महाराज हंसतीर्थजले शुभे ।
ततः परं महाभाग सुपुण्यं दारुपर्वतम् ॥ १८ ॥

गत्वा संपूज्य लोकेशं जम्बुकाख्यं महेश्वरम् ।
ततः परं महाराज पातालभुवनेश्वरम् ॥ १९ ॥

गत्वा संपूज्य विधिना समुपोष्य दिनत्रयम् ।
ततः परं महाराज रामगङ्गासरिज्जले ॥ २० ॥

स्नात्वा संपूज्य वालीशं तथैव शिवकिङ्करान् ।
ततः परं महाभाग पावनाख्यं गिरिं व्रजेत् ॥ २१ ॥

संपूज्य पावनं देवं पताकाख्यं गिरिं व्रजेत् ।
पताकेशं हरं तत्र संपूज्य विधिपूर्वकम् ॥ २२ ॥

ततोसितासितासङ्गे कालीशाख्यं महेश्वरम् ।
गत्वा संपूज्य विधिवच्चतुर्दंष्ट्रगिरिं व्रजेत् ॥ २३ ॥

---

१०. –d) ते1 °सत्तमः(→°सत्तम). ११. –c) ने3 –बहु–(→–मपि). १३. –a) न2.3 तथापि त्वां कथयिष्यामि. १७. –c) ने2 °तीरं (→°तीरे). –d) ने2 शुभं (→शुभां). १८. cd– १९. ने1. ab ⊙. १९. –d) ने1 °श्वरः (→°श्वरम्).

संभाव्य गिरिद्रंष्ट्रांस्तान् पुण्या(?)न् हिमालयोद्भवान् ।
ततो धर्माश्रयं पुण्यं दृष्ट्वा राजर्षिसत्तम ॥ २४ ॥

धर्मादीन् लोकपालान् वै दृष्ट्वा धर्मपदं शुभम् ।
धर्मद्वारं तु निष्क्रम्य ततो व्यासाश्रमं व्रजेत् ॥ २५ ॥

कृष्णद्वैपायनं व्यासं संपूज्य विधिपूर्वकम् ।
येनेदं परमं पुण्यं स्कन्दोत्पत्तिसमन्वितम् ॥ २६ ॥

स्कान्दं शिवकथायुक्तं शतसाहस्रिकं शुभम् ।
खण्डाख्यानसमायुक्तं रचितं जनमेजय ॥ २७ ॥

पूजयित्वा गुरुं व्यासं श्यामामूले तपोन्वितम् ।
आचारहीनापि जना तत्रस्था नृपसत्तम ॥ २८ ॥

ते ज्ञेया व्याससदृशा ऋषिपूज्या न संशयः ।
यो व्रजेन्नृपशार्दूल पुण्यं व्यासाश्रमात्परम् ॥ २९ ॥

स व्याससदृशो ज्ञेयो हीनोऽप्याचारलक्षणैः ।
आचारकरणं राजन् यावद्व्यासाश्रमं शुभम् ।
प्रोक्तं तावद् वसिष्ठाद्यैः ऋषिभिः सनकादिभिः ॥ ३० ॥

त्याज्यमाचारकरणं गत्वा व्यासाश्रमात्परे ।
जातोऽस्मि देवसदृश इति ब्रूयान्न संशयः ॥ ३१ ॥

ततः परं महाभाग कैरलाख्यगिरिं व्रजेत् ।
संपूज्य कैरलादेवीं पुलोमानं गिरिं व्रजेत् ॥ ३२ ॥

पुलोमेशं हरं तत्र पुलोमासरमध्यगम् ।
संपूज्य नृपशार्दूल तारकाख्यं गिरिं व्रजेत् ॥ ३३ ॥

तारिण्या [ : ] शारदायाश्च सङ्गमे नृपसत्तम ।
स्नात्वा संपूज्य देवेशं तारकेशं महेश्वरम् ।
पुण्या सिद्धगणानां वै गुहासुबहुला प्रभो ॥ ३४ ॥

---

२४. –c) ने3 °श्रमं (→°श्रयं) २५. –b) ने2 धर्मं (→धर्म–). –c) ने1 निष्क्रिम्य (→निष्क्रम्य).– २७. –a) ने2.3 स्कंदं (→स्कान्दं). २८. –b) ने3 °शूले (→°मूले) –c) ने2.3 अपि जाताचारहीना (ने3 °नश्). –d) ने1 °सत्तमे (→°सत्तम). ३०. ef–३१ d ने1. ⊙; ३०. –f) ने2 सत्यकारिभिः (→सनकादिभिः). ३२. –c) ने2 केरया देवी, ने3 केरजां देवीं (→कैरला देवीं) ३३. –b) ने2 °मध्यमं (→°मध्यगम्). ३४. –a) ने3 तरिण्या (→तारिण्या)

दृष्ट्वा संभाव्य सिद्धान् तान् तथान्यान् देवतागणान् ।
ततः परं महाराज सीमामायतनीं व्रजेत् ॥ ३५ ॥

मुण्डनं चोपवासं च कृत्वा तत्र प्रयत्नतः ।
तथा महामहानां च ततो गौरिगिरिं व्रजेत् ॥ ३६ ॥

गौर्य्याः सुगह्वरं पुण्यं दृष्ट्वा संपूज्य पार्वतीम् ।
दृष्ट्वा गौरिगिरिं प्राप्तमात्मगोत्रसमुद्भवम् ॥ ३७ ॥

वदन्ति पितरः सर्वे वैकुण्ठं प्राप्नुमो वयम् ।
यदि स्नाति कुले जातो मदीयेति वदन्ति हि ॥ ३८ ॥

व्रजामस्तर्हि वैकुण्ठं पुण्ये मानसरोवरे ।
परस्परमथागत्य वदन्ति पितरः शुभम् ॥ ३९ ॥

व्रजामश्चाद्य वैकुण्ठं विमानमधिरुह्य वै ।
सुहृत्सम्बन्धिभिः सार्द्धं यमालयगतैरपि ॥ ४० ॥

कुलजस्नानपूता वै तर्पिताः कुलजेन हि ।
प्राप्स्यामो देवभवनं देवेन्द्रं प्रति मोदितम् ॥ ४१ ॥

श्राद्धं कृत्वा च राजर्षे सुपुण्ये गौरिगह्वरे ।
तर्प्पयित्वा पितॄन् सर्वान् मृतान् सम्बन्धिबान्धवान् ॥ ४२ ॥

ततो गौरिगिरिं पुण्यं विलङ्घ्य नृपसत्तम ।
व्रजेत् सरोवरं पुण्यं राजहंसैः सुसेवितम् ॥ ४३ ॥

स्नात्वा तत्र यथान्यायमुपोष्य च दिनत्रयम् ।
दृष्ट्वा देवं हंसमयं शंकरं नृपसत्तम ॥ ४४ ॥

ततस्तु तर्प्पयेत् सर्वान् पितॄन् स्वान् मानवोत्तम ।
अपुत्रान् गोत्रजान् सर्वान् तर्प्पयेत् सुसमाहितः ॥ ४५ ॥

आब्रह्मभुवनाल्लोकाद् देवर्षिपितृमानवाः ।
तृप्यन्ति पितरः सर्वे तर्पिता मानसे जले ॥ ४६ ॥

---

३५. –b) ने$_1$ °थतनी (→°यतनीं). ३६. –a) ने$_2$ मुड* (→मुण्डनं). ३८. b) ने$_1$ वैकुंठ–(→वैकुण्ठं). –c) ने$_3$ स्वाति, +स्नाति (→स्नाति). ३९. –a) ने$_1$ वैकुण्ठ–(→वैकुण्ठं). ४१. –b) ने$_1$ वैं (→हि). –c) ने$_{1.3}$ प्राप्स्याम (→प्राप्स्यामो). –d) ने$_3$ न्द्र–(°न्द्र) ४२. –c) ने$_3$ तपयित्वा (→तर्प्पयित्वा) ४४. –d) ने$_1$ °सत्तम (→°सत्तमं). ४५. –b) ने$_1$ °त्तामान् (→°त्तम).

यस्य कस्यापि नाम्ना वै जलं मानसरोवरे ।
दत्तं स ब्रह्मभुवनं प्राप्नोति मनुजेश्वर ॥ ४७ ॥

तावद् यमालये वासो मानुषाणां दुरात्मनाम् ।
यावन्न मानसक्षेत्रे ददाति कुलजो जलम् ॥ ४८ ॥

यस्य वै दर्शनाद् राजन् वाजपेयफलं शुभम् ।
प्राप्नुवन्ति जनाः सर्वे म्लेच्छाश्चाचारवर्जिताः ॥ ४९ ॥

तर्पिताः पितरस्तत्र किन्न प्राप्स्यन्ति वैष्णवम् ।
पदं हि नृपशार्दूल मानसे क्षेत्रनायके ॥ ५० ॥

संतर्प्य च पितॄन् सर्वान् पूजयित्वाऽथ शंकरम् ।
ततः प्रक्रमणं कार्यं मानसाख्यस्य वै नृप ॥ ५१ ॥

ततो गङ्गाप्रवाहेषु स्नात्वा चैव पुनः पुनः ।
विष्णुपादाङ्कितां भूमिं संपूज्य च जनेश्वर ॥ ५२ ॥

ततो देवप्रयागाख्ये गत्वा संपूज्य शंकरम् ।
विसृज्य मानसक्षेत्रं संभाव्य च ऋषींस्तथा ॥ ५३ ॥

कथितं हि महाभाग प्रवेशं मानसः सरे ।
निर्गमं कथयिष्यामि श्रृणुष्व सुसमाहितः ॥ ५४ ॥

ततो व्रजेन्महापुण्यं नाम्ना लङ्कासरं शुभम् ।
तत्र स्नात्वा महाराज लङ्केशस्थापितं शिवम् ॥ ५५ ॥

दृष्ट्वा संपूज्य विधिवत् तत्र निष्क्रमणं स्मृतम् ।
ततस्तु शारदामूले स्नात्वा संपूज्य शंकरम् ॥ ५६ ॥

उपोष्य च यथान्यायं वरं निष्क्रमणं स्मृतम् ।
ततः परं महाराज तीर्थं खेचरसंज्ञकम् ॥ ५७ ॥

गत्वा संभावयन् सर्वान् खेचरान् देवनायकान् ।
मुण्डनं चोपवासं च कृत्वा तत्रैव भूपते ॥ ५८ ॥

---

४७. –a) ने1 नामेन (→नाम्ना वै). –c) ने2 समब्रह्मभुवं, ने3 स स ब्रह्मभुवं (→स ब्रह्मभुवनं). ४९. –a) ने3 म्लेच्छाद्याचारवर्जिताः
५०. b) ने 1 3 प्राप्स्यति (→प्राप्स्यन्ति). –c) ने1.3 °शार्दूलं (→°शार्दूल).
५१. –a) ने1 सर्वा (→सर्वान्). –d) ने1 प्रभो (→नृप). ५३. –a) ने3 °प्रयागाख्यं (→°प्रयागाख्ये). –c) ने1.3 विसर्ज्य (→विसृज्य); ने2 मानसं (→ मानस–). ५४. –b) ने2.3 परे (→सरे). –c) ने1 निर्गमे च कथिष्यामि.
५५. –a) ने2 °पुण्यां (→°पुण्यं). ५६. –b) ने1 शुभम् (→स्मृतम्).
५७. –d) ने 1.2 तोर्थे (→तीर्थं).

पूजयित्वा यथान्यायं प्रभविष्णुं महेश्वरम् ।
गत्वा ब्रह्मकलापं वै परं निष्क्रमणं स्मृतम् ॥ ५९ ॥

ततः छायान्वितं क्षेत्रं गत्वा वै नृपसत्तम ।
छायाक्षेत्रेश्वरं देवं पूजयित्वा प्रयत्नतः ॥ ६० ॥

तत्र रामसरं स्नात्वा तथैव ऋणमोचनम् ।
तथा ब्रह्मसरं स्नात्वा परं निष्क्रमणं स्मृतम् ॥ ६१ ॥
ततः परं शिवयुतं खलमुक्तिकरं शुभम् ।
गत्वाऽथ नृपशार्दूल परं निष्क्रमणं स्मृतम् ॥ ६२ ॥

ततो नन्दागिरिं पुण्यं स्नात्वा नन्दासरं शुभम् ।
गत्वा सन्तर्प्य ये देवान् पितॄंश्चापि प्रयत्नतः ॥ ६३ ॥

ततो व्रजेन् महाराज वैद्यनाथं महेश्वरम् ।
दृष्ट्वाऽथ मालिकां देवीं वरदां लोकपूजिताम् ॥ ६४ ॥
वृद्धं गङ्गाजले पुण्ये स्नात्वा संपूज्य मालिकाम् ।
संपूज्य वैद्यनाथेशं परं निष्क्रमणं स्मृतम् ॥ ६५ ॥
ततो ज्वालामयं तीर्थं वह्निज्वालासमन्वितम् ।
गत्वाऽथ नृपशार्दूल स्नात्वा रुद्रवतीजले ॥ ६६ ॥
पूजयेज्ज्वानलं देवं विधिदृष्टेन कर्मणा ।
तत्र पद्मावतीं पुण्यां स्नात्वा निःक्रमणं स्मृतम् ॥ ६७ ॥

कथितं हि महाराज परं निर्गमनं यथा ।
एवं वै कुरुते यस्तु श‍ृणु तस्यापि सत्फलम् ॥ ६८ ॥
अश्वमेधसहस्रेभ्यस्तस्य पुण्यं शताधिकम् ।
सहस्रगुणितं तस्य काशीवासान्न संशयः ॥ ६९ ॥
एकतः सर्वतीर्थानि दानानि विधिनानि च ।
एकतो मानसक्षेत्रं सर्वक्षेत्रोत्तमोत्तमम् ॥ ७० ॥
सर्वतीर्थेषु यत्पुण्यं काशीवासेऽपि यत्फलम् ।
तस्मात् सहस्रगुणितं फलमाप्नोति दर्शनात् ॥ ७१ ॥
सहस्रगुणितं पुण्यं वाजपेयान्नरेश्वर ।
दर्शनात्फलमाप्नोति मानसाख्यस्य वै तथा ॥ ७२ ॥

---

५९. ने2. cd ⊙.

६३. –a) ने2 °गिरि (→°गिरिं). ६५. –a) ने3 वृद्ध (→वृद्धं).
६६. –d) ने1 रुद्रावती (→रुद्रवती) ६७. –d) ने1 संक्रमणं (→निःक्रमणं).
७०. –c) ने2.3 मानसं तीर्थं (→मानसक्षेत्रं). –d) ने2 °तीर्थो° (→°क्षेत्रो°).

अश्वमेधाल्लक्षगुणं मानसाख्यस्य दर्शनात् ।
फलमाप्नोति राजर्षे सत्यं सत्यं वदाम्यहम् ॥ ७३ ॥

शतवर्षसहस्राणि काशीवाससमं फलम् ।
दर्शनान् मानसाख्यस्य प्राप्नुवन्ति जना भुवि ॥ ७४ ॥

तत्र गत्वा महाराज देहेनानेन चारुणा ।
व्रजिष्यसि विष्णुगृहं पुनरावृत्तिदुर्लभम् ॥ ७५ ॥

तेन मार्गेण राजानो मरुत्प्रभृतयोऽपरे ।
गता स्वेनैव देहेन वैकुण्ठं भुवनं प्रति ॥ ७६ ॥

तीर्थाख्यानसमायुक्तं मानसाख्यायनं शुभम् ।
यः पठेत् प्रातरुत्थाय शृणुयाद्वा समाहितः ।
संप्राप्य ब्रह्मभवनं देववन्मोदते प्रभो ॥ ७७ ॥

**॥ इति श्रीस्कन्दपुराणे मानसखण्डे मानसयात्राप्रवेशनिर्गमं नाम एकादशोऽध्यायः ॥ ११ ॥**

## १२

व्यास उवाच ।

इति श्रुत्वा स राजर्षिर्मार्गं तीर्थसमन्वितम् ।
प्रवेशं निर्गमं चैव श्रुत्वा दत्तमथाब्रवीत् ॥ १ ॥

धन्वन्तरिरुवाच ।

प्रवेशं निर्गमं चैव श्रुतं योगीन्द्रसत्तम ।
पुनर्मानसमाहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ २ ॥

दत्त उवाच ।

साधु साधु महाराज त्वया पृष्टं हि शोभनम् ।
तदहं कथयिष्यामि शृणुष्व सुसमाहितः ॥ ३ ॥

मानसाख्यसमं तीर्थं त्रैलोक्यां न मयेक्षितम् ।
यत्र स्नानेन राजर्षे विष्णोः सायुज्यमश्नुते ॥ ४ ॥

स्पर्शनाच्छंकरपदं पानाद् ब्रह्मपदं शुभम् ।
प्राप्यते राजशार्दूल मानसेयजलस्य च ॥ ५ ॥

पूजनाच्छिवलिङ्गस्य स्वर्णहंससमयस्य च ।
प्राप्येन्द्रपदवीं राजन् मोदते देववद् दिवि ॥ ६ ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शुकानामपि संवादं हंसस्य च महामते ॥ ७ ॥

पुरा कृतयुगस्यादौ काम्पिल्ये नगरोत्तमे ।
बभूवुर्नृपशार्दूल शुका वै नीडवासिनः ॥ ८ ॥

चैत्रको नाम राजर्षे शुकाध्यक्षो बभूव ह ।
नीतिज्ञस्तपशास्त्राणां पक्षिणां हितकारकारकः ॥ ९ ॥

---

१२

१. –b) ने3 मार्गे (→मार्गं). –c) ने2 प्रविशं (→प्रवेशं). २. –a) ने2 वापि, ने3 चापि (→चैव). ४. –a) ने3 °साख्यं (→°साख्य). –b) ने1.2 त्रैलोक्यान्न (→त्रैलोक्यां न). ५. –d) ने1 मा* सेय° (→मानसेय°). ७. –c) ने2 सुक° (→सुका°). ९. –c) ने2 °शास्त्राणि (→°शास्त्राणां).

बभूवुस्तत्सुता राजन् दुर्विनीताः कुलाधमाः ।
पक्षिणां चाहिते युक्ताः पितुर्बलविनाशकाः ॥ १० ॥

शौनको वलकश्चापि हेमश्रृङ्गो हयस्तथा ।
बभूवुस्ते दुराचारा निजस्वसृपरायणाः ॥ ११ ॥

कामदग्धेन मनसा रेमिरे नीडवासिनः ।
ततः कालेन महता पिता तेषां नरेश्वर ॥ १२ ॥

पञ्चत्वमाप दुःखेन पुत्राणां कामचारिणाम् ।
पितुरूर्ध्वदैहिकं राजन् कृत्वा कामपरायणाः ॥ १३ ॥

वने वने स्वस्वस्रा वै सह च क्रीडिरे हि ते ।
एकदा ते दुराचारा व्याधेन सह वै नृप ॥ १४ ॥

विचक्रुर्मिलनं सर्वे पक्षिनाशाय चञ्चलाः ।
मिलित्वा तं महाव्याधमूचुस्ते पापकारिणः ॥ १५ ॥

त्वमस्मभ्यं महाव्याध दद शालीन् यथोचितान् ।
तुभ्यं पक्षिगणान् सर्वान् दास्यामो नात्र संशयः ॥ १६ ॥

व्याधस्तद्वचनाद् राजन् दत्वा शालीन् बुभुक्षितान् ।
शुकान् दुर्वृत्तिसञ्जातान् तानात्महितकारकान् ॥ १७ ॥

ततस्तेऽपि पक्षिगणान् प्रतार्य नृपसत्तम ।
ददुर्व्याधाय मूढाय कुलान्तकारकाय च ॥ १८ ॥

निक्षिप्य व्याधस्तान् सर्वाञ्जाले नीत्वा गृहं ययौ ।
शब्दस्वासादिरहितान् कृपणान् नृपसत्तम ॥ १९ ॥

भुक्त्वा धान्यान् समादाय पुनस्तेषां गृहं ययौ ।
तेऽपि सर्वान् पक्षिगणान् प्रतार्य नृपसत्तम ॥ २० ॥

ऊचुः प्रीतिमतीं वाणीं मन्त्रयित्वा स्वकान् स्वकान् ।
व्याधोऽस्माकं गृहागत्य जालमाक्षिपति ध्रुवम् ॥ २१ ॥

छेदिष्यामायतं जालं भवद्भ्यो यदि रोचते ।
भवद्भिस्तत्र गन्तव्यमग्रे वै यदि रोचते ।
वयं तत्रागमिष्यामः पाशछेदादनन्तरम् ॥ २३ ॥

दत्त उवाच ।

इति तेषां तथ्यमतं ज्ञात्वा ते पक्षिसत्तमाः ।
जालं प्रति महाराज आजग्मुस्ते प्रतारिताः ॥ २४ ॥

---

१९. cd ने३. ⊙. २४. –b). ने३ °हत्तमाः (→°सत्तमा).

जालच्छेदे प्रसक्तास्ते न शेकुर्जालछेदनम् ।
स्थगितास्तत्र ते सर्वे जाले निपतिताभवन् ॥ २५ ॥

अथ तान् पतितान् ज्ञात्वा नीत्वा व्याधो गृहं ययौ ।
तेषां मांसेन राजर्षे कुटुम्बं स्वमतर्पयत् ॥ २६ ॥

अनेनैव विधानेन शुकाः पापपरायणाः ॥
हत्वा पक्षिगणान् सर्वान् ददुर्व्याधाय वै नृप ॥ २७ ॥

अथ कालेन राजर्षे नष्टान्यासन् कुलानि वै ।
पक्षिणां सारसादीनां तथा हंसादिनामपि ॥ २८ ॥

पक्षिहीनं वनं ज्ञात्वा व्याधस्तान् नृपसत्तम ।
न ददौ पुण्यभोग्यानि धान्यानि त्रिविधानि च ॥ २९ ॥

ततस्ते व्याधमार्गं वै ददृशुः शोककातराः ।
क्षुत्क्षामा म्लानवदनाः कुलहीनाभवन् नृप ॥ ३० ॥

गन्तुं ग्रामान्तरं राजन् न शक्तात्मकुलं विना ।
दुर्द्धरा मानुषैः सर्वैश्चिन्तामापुर्दुरत्ययाम् ॥ ३१ ॥

कुलक्षयकृतं दोषं मित्रद्रोहं च पातकम् ।
ततोऽस्माभिः कृतं बव्रुः शुकास्ते नृपसत्तम ॥ ३२ ॥

एवं विलिप्यमानास्ते क्षुधया नृपसत्तम ।
त्यक्ता नीडं सुरचितं ययुर्ग्रामान्तरं शुभम् ॥ ३३ ॥

न प्रापुर्भोजनं तत्र क्षुत्क्षामा नृपसत्तम ।
तस्मात् सरं शीतजलं ययुस्ते चैत्रकसुताः ॥ ३४ ॥

हन्म्येतानि सञ्चिन्त्य व्याधस्तदनु वै नृप ।
जगाम जालं नीत्वा वै तत्रैव सरसान्तरे ॥ ३५ ॥

शुकापि राजशार्दूल सरे हंसं तपस्विनम् ।
ददृशुर्ध्यायमानं तं वृद्धं पक्षविवर्जितम् ॥ ३६ ॥

ध्यायन्तं मानसं पुण्यं तपोनिश्चलचेतसम् ।
पूजितं गणगन्धर्वैर्हिंसापापादिवर्जितम् ॥ ३७ ॥

---

२५. -a) ने1 जालछेदेष्वसक्तास्ते. -d) ने1 स्थकिनास् (→स्थगितास्).
२८. -c) ने2 तरुसा° (→सरसा°). -c) ने3 सरसादीनां (→सारसादीनां).
३३. -a) ने1 विलप्य° (→विलिप्य°). ३४. -d) ने1 ययुस्ते चैत्रकांगजाः.
३५. -d) ने1.3 सरसांवरे (→सरसान्तरे). ३६. -d) ने1 वृद्धं पक्ष्यविवर्जितम्.
३७. -a) ने2 ध्यायन्ते (→ध्यायन्तं).

तं दृष्ट्वाऽऽशु शुकाः सर्वे क्षुधाखेदादिवर्जिताः ।
बभूवुर्नृपशार्दूल चत्वारो भगिनीसुताः ॥ ३८ ॥

ततस्तं पूजयामासुर्हंसं ते शुकनायकाः ।
ध्यानमार्गरतं शुद्धं देहवन्तं हरिं यथा ॥ ३९ ॥

पप्रच्छुस्ते सुखासीनं स्मृत्वा पापान्यनेकशः ।
स्वस्वसृगमनाद्यानि जन्मान्तरकृतानि च ॥ ४० ॥

शुका ऊचुः ।

पृच्छामि हंसं त्वां बुद्धं ध्यायन्तं लोकपूजितम् ।
स्वपुण्यैः पुण्यदेहं वै देवगन्धर्वपूजितम् ॥ ४१ ॥

द्विजराज शृणुष्व त्वं शुकानां पातकं महत् ।
अज्ञानतिमिरान्धानां ज्ञानमार्गविरोधिनाम् ॥ ४२ ॥

दृष्ट्वा त्वद्दर्शनं पुण्यं स्मृतमस्माभिः पातकम् ।
ऐहिकं प्राक्तनं चापि दुःखदं चान्यजन्मसु ॥ ४३ ॥

मानुषाणां दुःकृतिनां पातकानां क्षयं कथम् ।
कुलद्वेषकराणां च जायते हंसनायक ॥ ४४ ॥

दत्त उवाच ।

तेषां हि तन्मतं ज्ञात्वा शुकानां नृपसत्तम ।
उवाच वचनं हंसो वाचा चामृतपूर्वया ॥ ४५ ॥

हंस उवाच ।

सन्ति पापान्यनेकानि मानेषु शुकसत्तमाः ।
तेषां जन्मान्तरे भोगो जायते नात्र संशयः ॥ ४६ ॥

जन्मान्तरकृतानां हि भोगश्चात्रैव भुज्यते ।
जन्मन्यस्मिन् कृतं पुण्यं भुज्यते चान्यजन्मनि ॥ ४७ ॥

अत्रैवोशनसा गीतं शृण्वतां पक्षिसत्तमाः ।
जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ॥ ४८ ॥

चक्षुः श्रोत्राणि जीर्य्यन्ते तृष्णैका तरुणायते ।
कुर्वन्ति तृष्णया पापं मानवा मानवाधमाः ॥ ४९ ॥

---

३८. –a) ने3 दृष्ट्वा तु (→दृष्ट्वाशु). ४१. –a) ने3 शुद्धं (→बुद्धं). ४३. –c) ने1.3 एहिकं (→ऐहिकं). ४४. –c) ने2 वा (→च). ४५. –c) ने2 व* नं (→वचनं).

तृष्णया मातृगमनं तृष्णया कलहं स्मृतम् ।
द्वन्द्वादिकरणं सर्वं तृष्णया एव भूयते ॥ ५० ॥

चक्षुर्मार्गं प्राणमुखं श्रौत्रास्तु मार्गगामिनः ।
तृष्णा चौरा समुत्पन्ना मानुषाणां दुरात्मनाम् ॥ ५१ ॥

भुञ्जन्ति पञ्चभूतानि तत्साक्षी मानवः स्मृतः ।
ततः सर्वं कर्मफलं जन्मान्ते पापकारिभिः ॥ ५२ ॥

भुज्यते नात्र सन्देहो जन्मान्तरशतोद्भवम् ।
मनसा शाम्यते तृष्णा श्रोत्रैश्चक्षुः प्रशाम्यते ॥ ५३ ॥

मनो बुध्या प्रशाम्येत देहश्रेयेप्सिभिर्नरैः ।
तस्मात्तृष्णा परित्याज्या भवद्भिःशुकसत्तमाः ॥ ५४ ॥

यक्ततृष्णा द्वन्द्वहीनाः प्राप्स्यस्थ परमां गतिम् ।
कानि पापानि भवतामिह जन्मकृतानि वै ।
कानि जन्मान्तरीयानि कथ्यतां शुकसत्तमाः ॥ ५५ ॥

शुका ऊचुः ।

शृणुष्व त्वं महाभाग वाणीमस्माभिरीरिताम् ।
कथ्यमानां विचित्रार्थां त्वद्दर्शनसमुद्भवाम् ॥ ५६ ॥

वयं पापोद्भवाः पापाः पापवृत्तिपरायणाः ।
पापेनाऽपि विलिप्ताङ्गाः कथं जानीमहे वयम् ॥ ५७ ॥

त्वद्दर्शनमिह प्राप्य जानीमः स्वं पुरातनम् ।
पातकं पापदेहा वै जन्मान्तरकृतं द्विज ॥ ५८ ॥

शृणुष्व पक्षिणां श्रेष्ठ देशे तैलङ्गसंज्ञके ।
भारद्वाजकुलोत्पन्ना जाता स्म ब्राह्मणा वयम् ॥ ५९ ॥

सप्तमे जन्मनि पुरा शुकनाम्नो द्विजस्य च ।
सुता नीतिरताः शुद्धा वेदस्वाध्यायकारकाः ॥ ६० ॥

---

५०. –d) ने1 भुज्यते (→भूयते). ५१. –a) ने1.2 °सुखं (→°मुखं). –d) ने2.3 मनुष्याणां (→मानुषाणां). ५२. –a) ने3 प्राणि°, + पंच° (→पञ्च°). –b) ने2 साक्षि (→साक्षी). ५३. –d) ने1 श्रोत्रश् (→श्रोत्रैश्) ५६. –a) ने2 °भागा (→°भाग). ५७. –a) ने2 पापः, ने3 प्रायः (→पापाः). ५८. –b) ने1 जानामः (→जानीमः); ने2 स्व (→स्वं). ५९. –b) ने1.3 तैलिंग° (→तैलङ्ग°). –d) ने2 ब्रह्मणा (→ब्राह्मणा). ६०. –a) ने3 पुण्या (→पुरा).

द्विजवृत्तिरताः शान्ता जाताः स्म द्विजसत्तम ।
कालेनापि पिताऽस्माकं दैवात् पञ्चत्वताङ्गतः ॥ ६१ ॥

ततोऽस्माभिर्द्विजश्रेष्ठ पितुः सद्गतिकारकम् ।
कर्म समाप्य दाराणां कृतं पाणिग्रहं शुभम् ॥ ६२ ॥

कृतदारा वयं सर्वे जाता स्म धनिनां वराः ।
धनैर्बहुविधैर्हंस धर्मकामार्थनाशकाः ॥ ६३ ॥

द्विजानां भागहर्तारो लोलुपाः स्त्रीजनेष्वपि ।
मानिनोऽपि वयं सर्वे बभूवुर्द्विजसत्तम ॥ ६४ ॥

ततः कालेन महता द्विजानां पश्यतां द्विज ।
विहृत्य चरुभागं वै ब्राह्मणस्य तपस्विनः ॥ ६५ ॥

सह शूद्रैर्बुभुजिरे मोहिता बहुलैर्धनैः ।
ततश्चुकोप स ऋषिर्दृष्ट्वा चोपहृतश्चरुम् ।
सशापास्मान् स शूद्रान् वै पापिष्ठांश्चरुलोलुपान् ॥ ६६ ॥

ऋषिरुवाच ।

यस्माद्युस्माभिः पापिष्ठैश्चरुभागहृतो हि मे ।
तस्माच्छापं मदीयं वै गृह्णीतां शूद्रकैः सह ॥ ६७ ॥

यच्छूद्रैः सह युस्माभिर्भुक्तं मे वै चरूत्तमः ।
तस्माद्यूयं काकयोनौ भव जन्मसु पञ्चसु ॥ ६८ ॥

शुका ऊचुः ।

तदस्माभिर्महाभाग श्रुत्वा शापमृषेः कटुम् ।
प्रार्थितो ब्राह्मणः कश्चिच्छापनाशाय भो द्विज ॥ ६९ ॥

सोवाचास्मान् महाभाग जन्मनि सप्तमे हि वै ।
जनयित्वा निजं देहं शुकगेहे सुशोभने ॥ ७० ॥

शूद्रोऽपि व्याधस्य गृहे भविष्यति न संशयः ।
शूद्रिका भगिनी भूत्वा युस्माकं नायिका भवेत् ॥ ७१ ॥

---

६१. -a) ने$_{1}$ °रतां (→°रताः). -b) ने$_{2}$ °रुत्तमः (→°सत्तमः). ६२. -d) ने$_{2}$ कृत- (→कृतं). ६४. -b) ने$_{2}$ °जन° (→°जने°). ६५. -b) ने$_{1.3}$ पश्यता (→पश्यतां). ६६. -a) ने$_{1.2}$ बुभुजुतुर् (→बुभुजिरे). -d) ने$_{2}$ °लोलुपम् (→°लोलुपान्). ६७. -d) ने$_{3}$ गृह्णीयु (→गृह्णीतां). ६८. -b) ने$_{1}$ मुक्तं (→भुक्तं); ने$_{3}$ भुक्तां मे च हरुत्तमः -d) ने $_{2.3}$ भवत (ने$_{3}$ °तः) जन्म पंत्रसु. ६९. -b) ने$_{2}$-यमृषये (→शापमृषेः). ७१. -a) ने$_{2}$ व्याघ्र* (→व्याधस्य). -c) ने$_{2}$ भागिनी (→भगिनी). -d) ने$_{1}$ नयिका (→नायिका).

व्याधस्य च शुकानां च प्रीतिस्तत्र भविष्यति ।
ततो हंसान्मुक्तिपथं प्रापयिष्यथ वै द्विजाः ॥ ७२ ॥

ततस्तद्वचनं श्रुत्वा ऋषिशापाद् द्विजोत्तम ।
त्यक्त्वा कलेवरं सर्वे काकयोनौ वभूव तु ॥ ७३ ॥

पञ्चजन्मसु काकानां गृहेषु पक्षिनायक ।
भूत्वा शुकस्य गेहे वै जाताः स्मो नात्र संशयः ॥ ७४ ॥

सांप्रतं चापि पक्षीश पापादस्माभिः पातकम् ।
कृतं स्वशुकग्राहं वै तथा गोत्रवधं महत् ॥ ७५ ॥

कृत्वा व्याधेन मैत्रीं वै स्तोकेनैव च कारणात् ।
कुलक्षयं दोषकरं कृतमस्माभिः साम्प्रतम् ॥ ७६ ॥

एतस्य पातकस्यापि नास्त्यन्तं द्विजसत्तम ।
तव संदर्शनाद् हंस स्मृतं प्राक्चरितं महत् ॥ ७७ ॥

कस्मात् पुण्यतमस्त्वं वै जातोऽसि द्विजसत्तम ।
किमिह ध्यायसि हृदा तत् त्वं कथय सुव्रत ।
केनास्माकं पापनाशो जायते तद्वदस्व वै ॥ ७८ ॥

हंस उवाच ।

सोऽहं मानसपुण्येन पूतोऽस्मि शुकसत्तमाः ।
तमहं वाचयिष्यामि मानसं ब्रह्मनिर्मितम् ॥ ७९ ॥

तत्र मे मज्जनं पुण्यं वर्त्तते नात्र संशयः ।
तस्य ध्यानेनाहं पूज्यो देवतानां शुभात्मनाम् ॥ ८० ॥

गन्धर्वाणां द्विजानां च पूज्योऽस्मि नात्र संशयः ।
अजरामरतां वापि तस्य ध्यानेन वै खगाः ॥ ८१ ॥

प्राप्तवानस्मि रूपेण चामुना कायशोभिना ।
अन्तेऽप्यहं गमिष्यामि देहेनानेन वै खगाः ॥ ८२ ॥

सुपुण्यं ब्रह्मभुवनं देवर्षिगणसेवितम् ।
तस्माद्यूयं महाभागा मानसाख्यं सरोवरम् ॥ ८३ ॥

---

७३. –b) ने2.3 °शापं (→°शापाद्). –d) ने1 ह (→तु). ७५. –c) ने1 सुकपाहं (→सुकग्राहं). ७६. –a) ने1 मैत्री (→मैत्रीं). ७७. –b) ने2 नाल्पं तं (→नास्त्यतं). ८१. –c) ने2 अजरामरणं वापि. ८२. –c) ने2 अन्ये° (→अन्ते°); ने1 गमिख्यामि (→गमिष्यामि). ८३. –a) ने2 °भवनं (→°भुवनं).

पश्यन्तां शिवलिङ्गेन देवपूज्येन वै सह ।
तेन वै ब्रह्मभुवनं देवर्षिगणसेवितम् ॥ ८४ ॥

प्राप्स्यथ कामयानं वै अधिरुह्य न संशयः ।
सांप्रतं योगिगम्यो वै वर्तते मानसः सरः ॥ ८५ ॥

वसन्ते प्रथमे मासि गम्यतां यदि रोचते ।
तत्र गत्वा महाभागा यूयं ब्रह्मपदं शुभम् ॥ ८६ ॥

गमिष्यथ न सन्देहः स्वस्वस्रा चानया सह ।
ब्रह्महत्यादियुक्तोऽपि गोवधादपि वै खगाः ॥ ८७ ॥

प्राप्स्यते ब्रह्मभवनं देवदानवपूजितम् ।
किमनेनापि पापेन शापभारेण वै द्विजाः ॥ ८८ ॥

भीतिप्राप्ताप्ययं त्यज्य गम्यतां मानसे सरे ।
वर्वर्ति मानसक्षेत्रे पातकानां भयं कुतः ॥ ८९ ॥

योन्यन्तरभयं वापि नास्ति नास्तीह वै खगाः ।
मातुः सङ्गमनाद्वापि स्वसुः सङ्गात् तथैव हि ॥ ९० ॥

शुद्ध्यन्ति मानसक्षेत्रे तथ्यं वै कथितं मया ।
तस्माद् यूयं महाभागा मानसाख्यं सरोवरम् ॥ ९१ ॥

गत्वा पापसमूहं वै क्षाल्यतां नात्र संशयः ।
किन्तु यूयं महाभागा स्थिता वैव ममाश्रमे ॥ ९२ ॥

सोऽहं प्रातः समुत्थाय मज्जामि मानसं सरम् ।
तत्र स्नात्वाहु(?) देहेन पुनः पुण्याश्रमं प्रति ॥ ९३ ॥

आगमिष्यामि दिवसे द्वितीये नात्र संशयः ।
ततो युस्मानिहागत्य स्नापयामि जलैः शुभैः ॥ ९४ ॥

पक्षलग्नैर्हिमयुतैर्मानसेयैः सुशोभनैः ।
सांप्रतं भवतां गम्यो नास्ति वै मानसः सरः ॥ ९५ ॥

---

८४. –b) ने$_{1.3}$ देह° (→देव°). ८५. –a) ने$_{2}$ प्राप्स्यश्च (→प्राप्स्यथ). c) ने$_{3}$ °गम्या (→°गम्यो). –d) ने$_{2}$ मानसाः (→मानसं).

८८. ab–९० ab ने$_{1}$: ⊙. ८८. –b) ने$_{3}$ °पूजितः (→°पूजितम्). ९०. –b) ने$_{1}$ (→भक्ति ह नास्तीह). –d) ने$_{3}$ संगं (→सङ्गात्); ने$_{3}$ च (→हि). ९१. –a) ने$_{2}$ °क्षेत्रं (→°क्षेत्रे). ९४. –b) ने$_{3}$ तृतीये (→द्वितीये).

योगिगम्यो हि दुःप्राप्यो हिमर्तौ वर्तते सरः ।
प्राप्तां पश्य सुदुर्द्धर्षा हिमर्तुः खगसत्तमाः ॥
तस्मान्ममाश्रमे यूयं स्थीयध्वमहनि त्रये ॥ ९६ ॥

दत्त उवाच ।❀

हंसस्य वचनं श्रुत्वा शुका सर्वे नृपोत्तम ।
तस्थुर्हंसाश्रमे पुण्ये हंसश्रेणिविराज(जि?)ते ॥ ९७ ॥
हंसोऽपि तान् सामाश्वास्य मानसाख्यं सरोवरम् ।
जगामाकाशमार्गेण सिद्धकिन्नरशोभिना ॥ ९८ ॥
तत्र गत्वा स विधिवन् मज्जनं विचकार ह ।
ध्यात्वा वै स शिवं शान्तं पूजयामास तं नृप ॥ ९९ ॥
दृष्ट्वा सिद्धगणान् सर्वान् सरोवरजलं शुभम् ।
नीत्वाऽथ नृपशार्दूल साजगाम गृहं प्रति ॥ १०० ॥
तत्रागत्याथ राजर्षे समाहूय शुकोत्तमान् ।
स्नाण्यामास विधिवत् पक्षलग्नैर्जलैः शुभैः ॥ १०१ ॥
स्नापितास्ते शुका राजन् त्यक्त्वा शुककलेवरम् ।
बभूवुर्देवसदृशा देवदेहाः प्रभावतः ॥ १०२ ॥
ततस्ते देवलोकाद्वै विमानं देवसेवितम् ।
समानीतं देवगणैर्ददृशुर्नृपसत्तम ॥ १०३ ॥
तमारुह्याथ ते सर्वे पुरन्दरगृहं शुभम् ।
अप्सरोभिश्च संकीर्णं प्रवरैर्नृपसत्तम ॥ १०४ ॥
तत्र तान् पूजयामासुः पुरन्दरपुरोगमान् ।
मानसीयैर्जलकणैः स्नातान् वै देवनायकान् ॥ १०५ ॥
व्याधोऽपि हंसवचनं श्रुत्वा राजर्षिसत्तम ।
मत्वा च मानसं पुण्यं जगाम दिशमुत्तराम् ॥ १०६ ॥
दृष्ट्वा च मानसं पुण्यं स्नात्वा पीत्वा मुहुर्मुहुः ।
जगाम स्वेन देहेन ब्रह्मणः परमेष्ठिनः ॥ १०७ ॥

---

९६. –a) ने2 दुर्धर्षो (→दुर्द्धर्षा). –f) ने3 त्रीणि (→त्रये).
❀ ने2 दक्ष उवाच.

९९. –b) ने3 च चकार (→विचकार). १०१. –a) ने2 °गत्वाथ (→°गत्याथ). –d) ने1. शुभः (→शुभैः).

१०२. –b) ने1 शिव° (→शुक°). –१०३. –c) ने1.3 समानीत – (→समानीतं). १०५. –b) ने1 पुरंदरगृहं शुभम्.

१०५. b परं ने1 अधिकम्—

अप्सरोभिश्च संकीर्णं प्रवरैर्नृपसत्तमा ।
तत्र तान्पूजयामासुः पुरन्दरपुरोगमान् ॥ (= १०४ cd–१०५ ab)

पदं ब्रह्मर्षिभिः सेव्यं सुरसिद्धनिषेवितम् ।
विन्दुमात्रेण संस्नाताः पापाः शुककुलाधमाः ॥ १०८ ॥

प्राप्य माहेन्द्रपदवीं वसन्ति त्रिदशालये ।
किमु तत्र महाराज स्नातकानां शुभावहम् ॥ १०९ ॥

माहात्म्यं राजशार्दूल वक्तुं वर्षशतैरपि ।
न शक्यते देवगणैः सुरज्येष्ठादिभिः प्रभो ॥ ११० ॥

तत्र स्नात्वा देवदेहा जायन्ते मानवाधमाः ।
तस्य माहात्म्यकथने देवापि कश्मलं गताः ॥ १११ ॥

इत्येतत् कथितं राजन् शुकाख्यानं सुशोभनम् ।
आयुरारोग्यमैश्वर्यं सुखसम्पत्तिदायकम् ॥ ११२ ॥

इदं शुकाख्यानसमन्वितं विभो
गुणानुवादं सरसो वदन्ति ये ।
ते वै गृहं देवसुपूजितं हरे-
र्विहाय रुद्रादिपदं व्रजन्ति ते ॥ ११३ ॥

**॥ इति श्रीस्कन्दपुराणे मानसखण्डे शुकाख्यानं नाम द्वादशोऽध्यायः ॥**

१०८. –b) ने2 °सिद्धं (→°सिद्ध–). १११. –a) ने3 स्नाता (→स्नात्वा). –b) ने2 °धमा (→°धमाः).

# १३

दत्त उवाच ।

अथान्यदपि वक्ष्यामि शृणुष्व नृपसत्तम ।
मानसाख्यगुणैर्युक्ता कथिता मुनिना पुरा ॥ १ ॥

इदमेव परं श्रेयो मानुषे मनुजाधिप ।
मानसाख्यकथाप्रश्नं भाषणं तद् गुणैः सह ॥ २ ॥

मानुषे मनुजव्याघ्राः सारे संसारसागरे ।
मानसाख्यगुणं सारं विद्यते नात्र संशयः ॥ ३ ॥

दुर्ल्लभं मानुषे लोके मानुष्यं नृपसत्तम ।
तत्रापि दुर्लभं मन्ये मानसाख्यस्य दर्शनम् ॥ ४ ॥

यं दृष्ट्वा मानवाः सर्वे पापिष्ठा ब्रह्मघातिनः ।
न मातुर्ज्जठरे वासं पश्यन्ति नृपसत्तम ॥ ५ ॥

इतिहासं विचित्रार्थं शृणुष्व नृपसत्तम ।
माहात्म्यं लक्षणैर्युक्तं सुखदं मुक्तिदायकम् ॥ ६ ॥

पुरा कृतयुगस्यादौ मिथिलायां जनाधिप ।
जनकस्य कुले जातः केतुमान्नाम विश्रुतः ॥ ७ ॥

बभूव राजा मतिमान् भूतानां प्राणकम्पनः ।
स राजा ब्रह्मवृत्तीनां हर्त्ताऽभून् नृपसत्तम ॥ ८ ॥

वेदमार्गं विलोप्ता च यज्ञवृत्तिविलोपकः ।
सन्नीतिपथगाल्लोकान् त्यक्त्वा मन्त्रज्ञनायकान् ॥ ९ ॥

चौरैः सह महाराज चकार प्रीतिमुत्तमाम् ।
त्यक्त्वा सर्वान् जनपादन् नगरांश्च नृपोत्तम ॥ १० ॥

---

१३

३. –b) ने$_1$ सरसे सारमागरे. –c) ने$_1$ °गुणः (→°गुणं). ४. –b) ने$_1$ मानुख्यं (→मानुष्यं). ५. –c) ने$_1$ वास (→वासं). ६. –a) ने$_1$ इतिहास– (→इतिहासं). ७. –c) ने$_1$ जात (→जातः). ८. –a) ने$_1$ पति मा, ने$_2$ प्रतिमान् (→मतिमान्). ९. –a) ने$_1$ °विलुप्ता (→°विलोप्ता). १०. –c) ने$_1$ जान° (→जन°).

चकार स वने वासं विरमन् भिल्लपत्तिभिः ।
स राजा राजशार्दूल मूषयामास नागरान् ॥ ११ ॥

दिवा वनान्तरे स्थित्वा रात्रौ चौरसहायवान् ।
चौरैः सह महाराज ब्राह्मणानां गृहं ततः ॥ १२ ॥

मूषयामास सकलं नारीजनसमन्वितम् ।
मुह्यं(ह्यन् ?) जानपदानां स धनानि बहुलान्नि च ॥ १३ ॥

निनाय कालं पापात्मा त्यक्त्वा क्षात्रं न संशयः ।
ततः कालेन महता हृत्वा जानपदं धनम् ॥ १४ ॥

जहार स्त्रीजनान् राजन् लोकानां स नरेश्वरः ।
हृतदारधनाः सर्वे लोकास्तेन निराकृताः ॥ १५ ॥

तत्यजुर्नगरान् देशान् ग्रामानपि नरेश्वर ।
हृतदारधनाः सर्वे लोकास्तेन निराकृताः ॥ १६ ॥

ततः कालेन महता स राजा नृपसत्तम ।
जहार ब्राह्मणीं शुद्धां रूपयौवनशालिनीम् ॥ १७ ॥

ब्राह्मणीं ह्रीयमाणां तां ददर्श ब्राह्मणस्तदा ।
सोवाच तं तदा राजन् राजानं पापकारिणम् ॥ १८ ॥

मा गृहाण महाराज ब्राह्मणीं चारुलक्षणाम् ।
मम व्रतपरां तन्वीं वचसा चातकोपमाम् ॥ १९ ॥

इति संभाषमाणं तं ब्राह्मणं ब्राह्मणीपतिम् ।
उक्त्वा स राजा राजर्षे जहार ब्राह्मणीं शुभाम् ॥ २० ॥

ततः स ब्राह्मणो राजन् हृतदारोऽभवत्तदा ।
रुरोद सुस्वरं दीनं कान्तां कान्तेति चाब्रुवन् ॥ २१ ॥

त्यजस्व ब्राह्मणीं पूतां मा गृहाणेति चाब्रुवन् ।
पपात पादमूले वै राज्ञस्तस्य दुरात्मनः ॥ २२ ॥

---

१३. cd –१४. ab ने2.3. ⊙. –a) ने1 मुखया° (→मुषया°).
१४. –d) ने2 हत्वा (→हृत्या). १५. –d) ने1.2 °कृता (→कृताः).
१६. ने2.3. cd ⊙. –b) ने2 नरेश्वरं (→नरेश्वरः). १७. –c) ने1 सर्वां, +शुद्धां (→शुद्धां). १८. –a) ने1 ब्राह्मणी (→ब्राह्मणीं). १९. –c) ने1.3 तन्वी (→तन्वीं). २०. –c) ने3 त्यक्त्वा (→उक्त्वा). २१. –d). ने1 कातेति (→कान्तेति). २२. –a) ने2 ब्राह्मणी (→ब्राह्मणीं). –b) ने1 गृहाणोति (→गृहाणेति). –d) ने2 राज्ञास् (→राज्ञस्).

ततः स राजा भूपेन्द्र श्रुत्वा तत् करुणं वचः ।
रुषितोभूद् दुराचारश्चासिमुत्पाट्य वेगवान् ॥ २३ ॥

जहार ब्राह्मणशिरं त्रिपुण्ड्रेण विराजितम् ।
कर्णान्तदीर्घनयनैः शिखाभिश्चापि शोभितम् ॥ २४ ॥

नीत्वा तां ब्राह्मणीं राजन् स राजा विपिनं ततः ।
जगाम चौरैः सचिवैः मन्त्रिभिः सपुरोहितैः ॥ २५ ॥

ततः स गहनं प्राप्य तया सह नरेश्वर ।
चकार विपुलां क्रीडां वनेषूपवनेषु च ॥ २६ ॥

सरित्सु चापि कुञ्जेषु देशेषु नगरेषु च ।
नदीतटेषु पुण्येषु स्थलेषु च जलेषु च ॥ २७ ॥

स नृपो नृपशार्दूल विजहार तया सह ।
कालेन नृपशार्दूल स राजा ब्राह्मणीपतिः ॥ २८ ॥

कालेन स्वेन मन्दात्मा पञ्चत्वमगमत्ततः ।
मृतेऽपि राजशार्दूल स राजा चान्यजन्मनि ॥ २९ ॥

देहेन पापदेहोऽसौ बभूव ब्रह्मराक्षसः ।
स तदा राक्षसो राजन् नाम्ना मलयपर्वते ॥ ३० ॥

चकार वासं पापात्मा राक्षसैः सह तत्र वै ।
ततः स राक्षसो घोरो मनुष्याणां नरेश्वर ॥ ३१ ॥

चकार कदनं घोरंस्तथान्यैः राक्षसैः सह ।
कदाचिद् विन्ध्यपादाग्रे कदाचिन् मलये गिरौ ॥ ३२ ॥

कदाचिद् विपिने घोरे कदाचिन् नगरे प्रभो ।
जघान मानुषान् सर्वान् घण्टाकर्णेति विश्रुतः ॥ ३३ ॥

अवध्यो मानुषाणां हि बभूव नृपसत्तम ।
हयानाजान्मनुष्यांश्च सूकरान् महिषानपि ॥ ३४ ॥

जघान राक्षसो घोरो विकटैः राक्षसैः सह ।
ब्राह्मणान् क्षत्रियान् वैश्यान् तथान्यान् शूद्रनायकान् ॥ ३५ ॥

---

२३. –cd) ने1 दुराचाररसि°, ने2 दुराचार असि° (→दुराचारश्चासि°).
२४. –a) ने1 °शिरः (→°शिरं . –c) ने2.3 आकर्ण° (→कर्णान्त°).
३२. –b) ने2 –रावृतैः (→राक्षसैः). ३४. –a) ने2 अबध्यां (→अबध्यो).
३५. –b) ने2 विकण्ठैः (→विकटैः). –c) ने2 क्षत्रिया (→क्षत्रियान्). ने2.3.

शुनाद्यान् स्वापदाद्यांश्च जघान ब्रह्मराक्षसः ।
ततः स राक्षसो घोरो वसुधां विन्ध्यमध्यगाम् ॥ ३६ ॥
चकार जनहीनां वै तथा मलयमध्यगाम् ।
श्वापदैर्मर्कटैश्चापि सिंहाद्यैश्च मृगैरपि ॥ ३७ ।
चकार हीना वसुधां राक्षसो घोरदर्शनः ।
ततः कालेन महता ऋषिमेकं ददर्श सः ॥ ३८ ॥
तपस्यन्तं महात्मानं ऋषिपत्न्या सह प्रभो ।
ध्यायन्तं मानसं क्षेत्रं क्षेत्राणां नायकं शुभम् ॥ ३९ ॥
पत्न्यग्रे भाषमाणं तं सरोवरकथां शुभाम् ।
ददर्श राक्षसो घोरो राक्षसैः सह नरेश्वर ॥ ४० ॥
एनं हन्मीति सञ्चिन्त्य राक्षसो राक्षसैः सह ।
जगाम तत्र राजर्षे यत्र वै स ऋषिः स्थितः ॥ ४१ ॥
तत्र गत्वा ऋषेर्वाणीं मानसाख्यकथान्विताम् ।
पत्न्यग्रे कथ्यमानं स सुश्राव ब्रह्मराक्षसः ॥ ४२ ॥
ततः स राक्षसो घोरो त्यक्त्वा हिंसां दुराशयाम् ।
जगाम स ऋषेरग्रे राक्षसैः सह नरेश्वर ॥ ४३ ॥
तत्र गत्वा स राजर्षे सरोवरकथां शुभाम् ।
पूजितां देवगन्धर्वैः सुश्राव ब्रह्मराक्षसः ।
धर्माख्यानसमायुक्तं तथापि च गणान्वितान् ॥ ४४ ॥
सरोवरकथां पुण्यां शुश्राव ब्रह्मराक्षसः ।
ततस्तं पूजयामास ऋषिपत्न्या समन्वितम् ।
स घोरो राक्षसो राजन् ज्ञात्वा ज्ञानपथं महत् ॥ ४५ ॥
धर्माख्यानं च संश्रुत्वा ज्ञात्वा पापानुपार्जितान् ।
रुरोद सुस्वरं राजन् स घोरो ब्रह्मराक्षसः ॥ ४६ ॥
पप्रच्छ च ऋषिं तं वै पापानां निष्कृतिं प्रभो ।
कथं शुद्धिमवाप्स्यामि सञ्चिन्त्येति स राक्षसः ॥ ४७ ॥

---

३८. c 'महता'………३९. मान'–यावन्नास्ति; ने3. ४१. c 'यत्र'………………
४४. b राजर्षे' यावन्नास्ति.

४१. –d) ने1 यत्र वै सषि स स्थितः. ४२. –a) ने1 ऋषे वाणीं (→ऋषेर्वाणीं). –d) ने1 शुस्राव (→शुश्राव). ४३. –c) ने2 स जगाम (→जगाम स). –d) ने1 नेश्वर (→नरेश्वरः).

ने1 ४४. c–f ⊙. ४४. –b) ने2 शुभा (→शुभाम्). –f) ने3 तथा शिवगुणान्वितां. ४५. –a) ने1 °कथा (→°कथां). –c) ने1 ततः स राक्षसो घोरो स्तं पूजयामास. ४७. –b) ने2.3 निःकृति (→निष्कृति).

राक्षस उवाच ॥

पापात्मनां महत्पापं शाम्यति केन वै ऋषे ।
संसारसागरं केन तीर्य्यते कथयस्व माम् ।
जन्मान्तरकृतं पापं ब्रह्महत्यादिकं तथा ॥ ४८ ॥

परस्वहरणं ब्रह्मन् ब्राह्मणीगमनादिकम् ।
पातकं केन वै ब्रह्मन् नस्यते कथयस्व माम् ।
त्वामहं हन्तुमायातः सहैतै राक्षसैर्मुने ॥ ४९ ॥

श्रुत्वा पुण्यां सरकथां त्वन्मुखान् निसृतं शुभाम् ।
हिंसा मे चाघनिष्क्रान्ता पापमार्गप्रदर्शिनी ।
श्रुत्वा धर्मपथं त्वत्तो गतोऽस्मि ज्ञानसागरम् ॥ ५० ॥

क्वाहं पापमतिः पापो ब्रह्महा राक्षसाधमः ।
क ज्ञानदर्शिनी पुण्या कथा वै समुदाहृता ॥ ५१ ॥

श्रुत्वा हिंसां परित्यज्य त्वामहं पर्य्युपास्थितः ।
लोकोपकरणार्थं हि भवद्भिः क्रियते तपः ॥ ५२ ॥

नान्तं पश्याम्यहं ब्रह्मन् पातकानां प्रणाशिनाम् ।
जन्मद्वयार्जितानां च मया पापात्मनाऽपि हि ॥ ५३ ॥

ऋषिरुवाच ॥

सर्वेषां पातकानां वै निष्कृतिर्वर्तते भुवि ।
निष्कृतिर्ब्रह्महत्याया नास्ति नास्तीह राक्षस ॥ ५४ ॥

अपि मित्रवधं कृत्वा तथैव स्त्रीवधं नृणाम् ।
दृष्ट्वा तीर्थानि देहं वै शुद्ध्यन्ते ब्रह्मराक्षस ॥ ५५ ॥

न तु ब्रह्मवधं घोरं कृत्वा राक्षसनायक ।
शुद्ध्यन्ति मानवाः सर्वे सत्यं ते कथितं मया ॥ ५६ ॥

इति तद्वचनं श्रुत्वा स घोरो ब्रह्मराक्षसः ।
पुनस्तं प्रार्थयामास देहनिर्मुक्तिहेतवे ॥ ५७ ॥

---

४८.–a) नें2 पापात्मनीं, ने3 पापात्मनां (→पापात्मानं); ने1 मत्पापं(→महत्पापं).
४९. –a) ने3 चापि (→ब्रह्मन्). ५३. –b) ने2 प्रणाशिनम् (→प्रणाशिनाम्).
५५. –d) ने1 शुद्ध्यते (→शुद्ध्यन्ते). ५७. –d) ने2 देहं निर्मुक्तहेतवे.

राक्षस उवाच ॥

नाहं घोरतरं देहं ब्रह्मन् धारयितुं क्षमः ।
समर्थोऽस्मि क्षणमपि पापपूर्णं दुराशयम् ॥ ५८ ॥

उपायं चिन्त्यतां ब्रह्मन् यथा ब्रह्मवधादहम् ।
मुक्तिं प्राप्स्यामि तत्त्वज्ञ त्यक्त्वा घोरं कलेवरम् ॥ ५९ ॥

श्रुत्वा ज्ञानामृतं त्वत्तः स्मृता पापानुपार्जितान् ।
यथा ते नाशमायान्ति तथा त्वं चिन्त्यतां मुने ॥ ६० ॥

दत्त उवाच ॥

हन्त तस्य च कर्माणि श्रुत्वा कारुणिको मुनिः ।
उवाच वचनं राजन् स्मृत्वा ब्रह्मपदं महत् ॥ ६१ ॥

ऋषिरुवाच ॥

अहं ते कथयिष्यामि शृणुष्व सुसमाहितः ।
यथा त्वच्छुद्धिमाप्नोति त्यक्त्वा पापानिमान् बहून् ॥ ६२ ॥

क्व भीतिर्मानुषे लोके पापानां दुःखदायिनाम् ।
जागर्ति मानसक्षेत्रे शिवलिङ्गसमन्विते ॥ ६३ ॥

पातकानां महद्भीतिं त्यजस्व ब्रह्मराक्षस ।
स्मृत्वैकं मानसं क्षेत्रं दुष्कृतानां भयावहम् ॥ ६४ ॥

तावद् गर्जन्ति तीर्थानि दानानि विविधानि च ।
यावन्न स्मर्य्यते श्रीमन् मानसः सरनायकः ॥ ६५ ॥

तावद् वदन्ति मुनयो धर्माणि विविधानि च ।
यावन्न मानसं क्षेत्रं स्मरन्ति भुवि मानवाः ॥ ६६ ॥

---

५८. -b) ने2 धारयितं (→धारयितुं). ६०. -b) ने2 °जिताम् (→°जितान्) ६०. -c) नें1 नाश°, ने2 नाद्य° (→नाश°) ६१. -a) ने1 तेन संभाषितं सर्वं. ६२. -a) ने2.3 हंत (→अहं). -b) ने2 °हिताः (→°हितः). -c) ने3 त्वं शुद्धि° (→त्वच्छुद्धि°). ६३. -d) ने1 °लिंगं (→°लिङ्ग-).

६५. -c) ने1 ब्रह्मन् (→श्रीमन्).

अतः परं ने1 कोष्ठके अधिकम्—

'सर्वं सत्यं ते कथितं मया················।

इति तद्वचनं श्रुत्वा स घारो ब्रह्मराक्षसः ॥

पुनस्तं प्रार्थयामास मानवा··············॥'

६६. -c) ने2.3 मानस-(→मानसं).

तावद्यमालये वासो मर्त्यानां पापकारिणाम् ।
यावन्न मानसक्षेत्रं पश्यन्ति रक्षसां वर ॥ ६७ ॥

तावद् भ्रमन्ति मनुजा संसारे सागरोपमे ।
यावन्न मानसक्षेत्रं जानन्ति भुवि दुर्ल्लभम् ॥ ६८ ॥

तावत् सर्वे नृणां श्रेष्ठा राजसूयं वदन्ति वै ।
यावन्न मानसकथां शृण्वन्ति भुवि दुर्लभाम् ॥ ६९ ॥

तावद्धि विष्णुभवनं मनुष्याणां सुदुर्लभम् ।
यावन्न मानसजले मज्जन्ति भुवि दुर्लभे ॥ ७० ॥

तावद् योगपथं पुण्यं वदन्ति शिवयोगिनः ।
तपोध्यानसमायुक्तं दुर्ज्ञेयमकृतात्मभिः ॥ ७१ ॥

संस्तुतं देवगन्धर्वैर्दैतेयैश्चापि राक्षस ।
यावन्न मानसक्षेत्रे पश्यन्ति शङ्करं प्रभुम् ॥ ७२ ॥

तावत् साङ्गयुतान् वेदान् स्तुवन्ति ब्राह्मणा भुवि ।
यावन्न मानसक्षेत्रं वेदवादं श्रवन्ति हि ॥ ७३ ॥

तावत् काश्यां हि मनुजा मर्तुमिच्छन्ति राक्षस ।
यावन्न मानसक्षेत्रे जानन्ति गुक्तिदायकम् ॥ ७४ ॥

तावत् कीटपतङ्गाद्या योनिं पश्यन्ति राक्षस ।
कूष्माण्डाजृभकाश्चैव तथान्ये ब्रह्मराक्षसाः ॥ ७५ ॥

स्वानश्च स्वापदाद्याश्च तावद् योनिं व्रजन्ति हि ।
यावन् मानसखण्डे वै न जाता राक्षसोत्तम ॥ ७६ ॥

**॥ इति श्रीस्कन्दपुराणे मानसखण्डे मानसकीर्तनं नाम त्रयोदशोध्यायः ॥ १३ ॥**

---

६७. -d) ने$_1$ राक्षसां (→रक्षसां). ६८ c परं ने$_1$ अधिकम्—
**पश्यन्ति शङ्करान्वितम् । यावन्न मानसक्षेत्रं ॥**

७१. -d) ने$_1$ दुर्जेयमकृतात्मनिः. ७२. -d) ने$_2$ *करं (→शङ्करं). ७३. -a) ने$_3$ संग° (→सांग°). -c) ने$_2$ °क्षेत्रं (→°क्षेत्रे). -d) ने$_1$ श्रुवंति, ने$_3$ संश्रवंति (→श्रवन्ति). ७४. -d) ने$_1$ मानसः (→मानस-). ७५. -b) ने$_3$ योनीं (→योनिं). ७६. -a) ने$_1$ स्वानश्च स्वापदाम्राश्च.

## १४

ऋषिरुवाच ।

अत्र ते कथयिष्यामि इतिहासं पुरातनम् ।
मुक्तिदं स्थिरचित्तानां पापानां नाशकारकम् ॥ १ ॥
पुरा सत्ययुगस्यान्ते त्रेतादौ रक्षनायक ।
बभूव मागधे रम्ये देशे चाण्डालकाधमः ॥ २ ॥
जात्यन्धः प्राक्तनेनैव पातकेनेह राक्षस ।
स्नेहेन पितरौ तस्य बालं तं वै पुपोषतुः ॥ ३ ॥
कदन्नेनामिषेनापि स्तन्नेनापि च राक्षस ।
स पञ्चहायनो बालः प्राक्तनेनैव कर्मणा ॥ ४ ॥
जात्यन्धोऽपि महारक्षः कुष्ठरोगमवाप सः ।
बभूव कीटैः संपूर्णः पूयशोणितसम्भवैः ॥ ५ ॥
करपादविहीनोऽभूत् स पापो राक्षसोत्तमः ।
ततः कालेन महता पितरौ जातुनायकौ ॥ ६ ॥
कृतान्तवशगौ तस्य जरया संबभूवतुः ।
ततस्तु बान्धवैः सर्वैंस्त्यक्तोऽभूत् स कुलाधमः ॥ ७ ॥
कृमिभिः पूर्णदेहो वै पूयशोणितसंभवैः ।
करे यष्टिं समालम्ब्य ततश्चाण्डालकाधमः ॥ ८ ॥
ययाच ग्रामनगरानशनं रक्षनायकः ।
ततोच्छिष्टेन पिण्डेन शुनापूतेन वापि हि ॥ ९ ॥
पुपोष देहं देहिघ्न दैवोद्दिष्टेन कर्मणा ।
ततः कालेन महता यात्रां भद्रवटस्य हि ॥ १० ॥

---

१४

१. –d) ने$_1$ नास° (→नाश°). २. –d) ने$_1$ °धम (→°धमः). ३. –d) ने$_1$ पुपोषतु (→पुपोषतुः). ४. –d) ने$_2$ कर्मण (→कर्मणा). ५. –a) ने$_2$ जत्यंधो° (→जात्यन्धो°). ६. –d) ने$_{1.2}$ °नायकः (→°नायकौ). ७. –c) ने$_1$ सर्वैं, ने$_2$ सर्वें (→सर्वैंस्). ८. –c) ने$_3$ यष्टीं (→यष्टिं). ९. –a) ने$_1$ ययाचे (→ययाच).

ययुर्जानपदाः सर्वे ससैन्यबलवाहनाः ।
राजानो राजमुख्याश्च राजपत्निभिरन्विताः ॥ ११ ॥
ब्राह्मणाः क्षत्रिया वैश्या शूद्राश्चैवेतरे जनाः ।
वाहनैर्विविधैर्युक्ताः कलत्रैश्च समन्विताः ॥ १२ ॥
ययुर्भद्रवटं पुण्यं पुण्याश्रमनिषेवितम् ।
ततो भेरिमृदङ्गानां श्रुत्वा दुन्दुभिनिःस्वनम् ॥ १३ ॥
चाण्डालोऽपि तदा यात्रां ययौ भद्रवटस्य हि ।
नागरीयैर्जनैः सार्द्धं वसनाशनतृष्णया ॥ १४ ॥
तत्र गत्वा जनान् सर्वान् याचयामास चाशनम् ।
तेनाशनेन वै रक्षः शरीरं स पुपोष ह ॥ १५ ॥
ततः कालेन महता मानसाख्यकथां शुभाम् ।
शुश्राव ऋषिमुख्याणामग्रतो राक्षसोत्तमः ॥ १६ ॥
सरोवरस्य माहात्म्यं श्रुत्वा राक्षसनायकः ।
दधार सरनामं वै मानसेति तदानघ ॥ १७ ॥
ततः कालेन महता पुरी मगधपालिताम् ।
जपन् मानसनामं वै स जगाम जनैः सह ॥ १८ ॥
ततः कालेन महता दैवात् पञ्चत्वमेयिवान् ।
पीडितश्चात्मसम्भूतै रोगै राक्षसनायक ॥ १९ ॥
ततस्तं ब्रह्मभुवनात् समागत्यार्थ(थ ?)किङ्कराः ।
समारोप्य विमानाग्रे कृमिभिः सह राक्षसः ॥ २० ॥
यावद् ब्रह्मभुवं पुण्यं नेतुं ते समुपस्थिताः ।
तावत् तान् यमदूता वै समागत्य यमालयात् ॥ २१ ॥
तानूचुस्ते महाभागा वचनं यमकिङ्कराः ।
शक्तिशूलगदायुक्ताः पाशमुद्गरपाणयः ॥ २२ ॥

यमदूता ऊचुः ।

त्यजन्तु ऋषिशार्दूलाः पापात्मानं नराधमम् ।
धर्माध्ववर्जितं पापं चाण्डालाधमसंज्ञकम् ॥ २३ ॥

---

११. –a) ने2 °पादाः (→°पदाः). –c) ने1 °मुष्याश्च (→°मुख्याश्च). –d) ने2 °पक्षि° (→°पत्नि°); ने1 °रावृता(→°रन्विताः). १२. –b) ने1 जना (जनाः). १७. –d) ने1 मनसेति (→मानसेति). १८. –c) ने2 मानस° (→मानस°). २०. –a) ने2.3 °भवनां (→°भुवनात्). २३. –c) ने2.3 पापश् (→पापं).

न चानेन तपस्तप्तं न हुतं यज्ञकर्मणि ।
नानेन तर्पिता विप्रा नहि संपूजितः शिवः ॥ २४ ॥

न चायं पुण्यतीर्थे वै मृतोऽस्ति ऋषिसत्तमाः ।
कथमेनं दुराचारं विमानमधिरोप्य वै ॥ २५ ॥

पूयशोणितदिग्धाङ्गं क्रमिभिः परिपूरितम् ।
भवद्भिर्ब्रह्मभुवनं कथं दर्शयत द्विजाः ॥ २६ ॥

देवर्षिगणगन्धर्वैः दुःप्राप्यं मानुषैरपि ।
नैतस्यान्येषु जन्मेषु वर्तते समुपार्जितम् ।
पुण्यं पुण्यजलस्नानं यज्ञं वापि द्विजोत्तम ॥ २७ ॥

ऋषय ऊचुः ।

शृण्वन्त्वेतस्य पुण्यं वै जन्मान्तरकृतं महत् ।
यं श्रुत्वा पापनिरतो जनो मुक्तिपथं व्रजेत् ।
एष जन्मान्तरे दूता ब्राह्मणो वेदपारगः ॥ २८ ॥

पराशरकुलोत्पन्नो नाम्ना वेदनिधिः स्मृतः ।
बभूव कोङ्कणे देशे सर्वदा रतिलालसः ॥ २९ ॥

तत्रानेन महाभागाः सेविता वारनायिकाः ।
दिने दिने दश दश पापेनानेन कामिना ॥ ३० ॥

तत्रानेन महाभागा वारस्त्रीपरिचारिणा ।
कृतं मांसाशनं चापि मदिरा च निषेविता ॥ ३१ ॥

बभूव पापनिरतो वेदमार्गविलोपकः ।
द्विजाचरणविभ्रष्टो लोकद्वेषकरस्तथा ॥ ३२ ॥

तत्याज्य पुत्रदारादीन् तथैव स्वजनान् शुभान् ।
तथैव पोषणं तेषां त्यक्तं चानेन पापिना ॥ ३३ ॥

ततः कालेन महता त्यक्त्वा स्वजनबान्धवान् ।
जगाम स वने दूता नीत्वा वाराङ्गनात्रयम् ॥ ३४ ॥

विजहार वने रम्ये नायकाभिस्तदा रहः ।
चकार गीतविद्यां वै त्यक्त्वा वेदपथं महत् ॥ ३५ ॥

---

२५. –d) ने3 ते (→वै). २६. –c) ने2 °भवनं (→°भुवनं). –d) ने1 दर्शयते (→दर्शयत). २७. –c) ने2 नैतस्यान्तेषु जन्मेषु. –f) ने1 द्विजोत्तमा (→द्विजोत्तम) २८. –f) ने1.2 °पारगाः (→°पारगः). ३१. –c) ने1 मांसासनं (→मांसाशनं). ३२. –d) ने2 *क° (→लोक°). ३३. –d) ने1 पापिनां (→पापिना). ३५. –b) ने1 नाचकाभि सहस्तदा.

ततः कालेन महता स द्विजो यमकिङ्कराः ।
शुश्राव सरनामं वै मानसेति न संशयः ॥ ३६ ॥

तत्रैव सरनामं वै धारयामास किङ्कराः ।
पापान्तकारकं पुण्यं गणगन्धर्वपूजितम् ॥ ३७ ॥

ततस्तद् वारणा दूतास्तस्य पातककोटयः ।
प्रनष्टा चाभवन् नूनं वेश्यासेवनसंभवाः ॥ ३८ ॥

कालेन सरनामं वै तत्याज्य यमकिङ्कराः ।
बभूवासौ पुनरपि वेश्यासङ्गरतो द्विजः ॥ ३९ ॥

चकार मदिरापानं पलायनपरायणः ।
तथैवानेन संत्यक्ताः पुत्राः कालवशं ययुः ॥ ४० ॥

पोष्यहीनाः पयोहीनाः बान्धवैश्च विसर्जिताः ।
दाराश्चानेन संत्यक्ताः पतिहीनाश्च किङ्कराः ॥ ४१ ॥

भेजे चान्यं हि भर्त्तारं कामतप्ता न संशयः ।
अयमप्यमृतप्रायं त्यक्त्वा धर्मपथं शुभम् ॥ ४२ ॥

तथा मानसनामं वै वेदाध्ययनकं शुभम् ।
त्यक्त्वा पञ्चत्वमापन्नो बभूव यमकिङ्कराः ॥ ४३ ॥

मृतोऽपि प्राक्तनेनैव पातकेन न संशयः ।
बभूव चैव चाण्डालो जात्यन्धो यमकिङ्कराः ॥ ४४ ॥

यदनेन महाभाग त्यक्त्वा वेदपथं महत् ।
क्रीडिता वारवनिता जात्यन्धोऽनेन चाभवत् ॥ ४५ ॥

कृतं मांसाशनं चापि तत्रानेन दुरात्मना ।
तेन पापेन चाण्डालो बभूव यमचारणाः ॥ ४६ ॥

ते मृता चाभवन् कीटा देहस्य यमकिङ्कराः ।
दिने दिने दश दश यदनेन दुरात्मना ॥ ४७ ॥
सेविता वारवनिता तेन कुष्ठत्पमाप्तवान् ।
नानेन तर्पिता विप्रा न स्वाध्यायः कृतं च यत् ॥ ४८ ॥

---

३८. –c) ने$_3$ प्रगष्टा अभवन्नूनं. –d) ने$_1$ वेश्यासंगमनसंभवाः. ३९. –c) ने$_2$ बभूव सं, ने$_3$ बभूव यं (→बभूवासौ). ४०. –d) ने$_1$ ययु (→ययुः). ४१. –a) ने$_1$ पोष्यहीना (→पोष्यहीनाः). ४२. –c) ने$_1$ अयमप्यमतप्रायं. ४४. –c) ने$_3$ चैष (→चैव). ४५. –a) ने$_1$ °भागा (→°भाग). –d) ने$_3$ जात्यंधो तेन चाभवत्. ४६. –a) मांशासनं (→मांसाशनं). ४७. cd ने$_3$ ⊙.
४८. –b) ने$_{2.3}$ तेन कुष्टमवाप्तवान्. –d) ने$_1$ स्वाध्याय– (→स्वाध्यायः).

नेष्टापूर्तादिकं वापि तेनासौ क्षुधितोऽभवत् ।
इहैव मानुषाणां हि दृश्यते नात्र संशयः ॥ ४९ ॥
स्वर्गापवर्गमार्गं च तथा पापादिलक्षणम् ।
शतजन्मार्जितैः पुण्यैः प्राप्यते ब्राह्मणी तनुः ॥ ५० ॥
नास्ति पुण्यविपाको वै मानुष्याणां शुभात्मनाम् ।
तस्मादयं महाभागाः प्राप्यते ब्रह्ममण्डले ॥ ५१ ॥
यदनेन कृतं पापं प्राग् जन्मनि दुरात्मना ।
फलं तस्य महाभागा भुक्तमत्र न संशयः ॥ ५२ ॥
भुक्त्वा पापफलं चात्र प्राप्य योनिं निरर्थकाम् ।
अस्य ब्रह्मगृहे वासो विद्यते नात्र संशयः ॥ ५३ ॥
यदनेन महाभागा मानसाक्षरसंयुतम् ।
नाम उच्चारितं पुण्यं तेन प्राप्नोति शास्वतम् ॥ ५४ ॥
मानसोच्चारणादस्य नष्टाः पातककोटयः ।
दुःसंसर्गात्समारब्धा धर्मकामार्थनाशकाः ॥ ५५ ॥
यन्नामोच्चारणात्सर्वे यान्ति ब्रह्मपदं महत् ।
तन्नामोच्चारणादेव मृतो मगधमण्डले ॥ ५६ ॥
मानसाक्षरयुक्तानां मनुष्याणां दुरात्मनाम् ।
यत्र तत्र मृतिर्भूत्वा वासो ब्रह्मपदे शुभे ॥ ५७ ॥
तथानेन महाभागाः प्राग्जन्मनि सरोवरम् ।
संस्मृतं तेन पुण्येन श्रुत्वा सरकथामिह ॥ ५८ ॥
प्राप्य भद्रवटं पुण्यं यदेषः श्रुतवान् कथाम् ।
यदत्र ब्रह्मभुवने नीयतेऽस्माभिः किङ्कराः ॥ ५९ ॥
मानसाख्यं समुच्चार्य पशुघ्नापि यमालयम् ।
न पश्यन्ति यमं दूता किमुतान्ये यतव्रताः ॥ ६० ॥
मानसोच्चारणात् सद्यः कुलकोटिसमन्विताः ।
व्रजन्ति ब्रह्मभुवनं मानवा दवसेवितम् ॥ ६१ ॥

---

५०. -d) ने1 तनु (→तनुः). ५१. -b) ने1 दुरा° (→शुभा)°. -d) ने3 ब्राह्म° (→ब्रह्म°). ५२. -a) ने1.3 प्राक् (→प्राग्). -d) ने1 प्राप्यते ब्रह्ममंडले, +भुक्तमत्र न संशयः. ५४. -c) ने3 नाममुच्चारितं पुण्यं. ५६. -c) ने3 °देष (→°देव). ५८. -a) ने1.2 °भागा (→°भागा). -c) ने2 तदत्र (→यदत्र). -d) ने1 नीयते स्माभकिंकराः. ६०. ने2 नान्ये (→तान्ये).

ब्रह्महत्याशतं वापि कृत्वा मानसरोवरम् ।
स्नात्वा संक्षालयन्ति स्म मानवा नात्र संशयः ॥ ६२ ॥

संपर्कादपि लोकानां मानसाख्यसरोवरः ।
ददात्यभीष्टं स्मर्तॄणां संस्मृतो यमकिङ्कराः ॥ ६३ ॥

तद्ध्यानेन मृतानां वै मनुष्याणां महात्मनाम् ।
विद्यते ब्रह्मभवने वासो वासान्तकारकाः ॥ ६४ ॥

एतस्य देहसंलग्नाः कीटकापि महात्मनः ।
व्रजन्ति ब्रह्मभुवनं संपर्कादस्य शोभनम् ॥ ६५ ॥

कथं न ज्ञायते पुण्यं मानसस्मरणोद्भवम् ।
भवद्भिर्धर्म्ममार्गज्ञा दुःप्राप्यं दैवतैरपि ॥ ६६ ॥

गम्यतां भवनं क्षिप्रं धर्मराजस्य किङ्कराः ।
त्यज्यतां चात्र सन्देहं क्रियन्तां यमशासनम् ॥ ६७ ॥

ऋषिरुवाच ।

इति ब्रह्मर्षिभिः प्रोक्तं वचनं यमकिङ्कराः ।
निःसंशया सुमनसा ययुर्यमगृहं प्रति ॥ ६८ ॥

तेऽपि चाण्डालजं नीत्वा विमानमधिरोप्य वै ।
सह तैः कीटकै रक्ष दिव्यदेहधरैः शुभैः ॥ ६९ ॥

प्रजग्मुर्ब्रह्मभवनं ब्रह्मर्षिगणसेवितम् ।
पूजितं देवगन्धर्वैर्वशिष्ठाद्या महर्षयः ॥ ७० ॥

संप्राप्य ब्रह्मभवनं देवर्षिगणसेवितम ।
मेने सरप्रभावं वै पूर्णेन मनसापि ह ॥ ७१ ॥

इत्येतत्कथितं रक्ष माहात्म्यमनुवर्णितम् ।
सरोवराख्यानयुतं समस्ताघप्रणाशनम् ॥ ७२ ॥

---

६२. –c) ने$_1$ °लयाति (→°लयन्ति). ६३. –c) ने$_1$ स्म नृणां (→स्मर्तॄणां). ६४. –c) ने$_1$ °भुवने (→°भवने). ६५. –a) ने$_2$ देव° (→देह°). ६६. –b) ने$_2$ मानसः (→मानस–). ६७. –c) ने$_1$ संदेहः (→सन्देहं. –d) ने$_3$ क्रियतां (→क्रियन्तां). ७०. –a) ने$_1$ जजग्मुर् (→प्रजग्मुर्); ने$_2$ °भुवनं (→°भुवनं). –d) ने$_3$ वसिष्टाद्यैर् (→वशिष्ठाद्या [ : ]); ने$_2$ महर्षिभिः (→महर्षयः). ७१. –a) ने$_1$ भुवनं, ने$_2$ °भवने (→°भवनं).

त्वमपि श्रद्धया युक्तो व्रज मानसरोवरम् ।
देवर्षिगणगन्धर्वैः पूजितं सुमनोहरम् ॥ ७३ ॥

तत्र त्वं ब्रह्महत्याया दर्शनान्निष्कृतिं पराम् ।
गमिष्यसि महाभाग सत्यं ते व्याहृतं मया ॥ ७४ ॥

आख्यानमेतत्सरनायकस्य
ब्रह्मर्षिणा राक्षसनायकाय ।
प्रकाशितं मानसनामयुक्तं
शृण्वन्ति ये ब्रह्मपदं प्रयान्ति ॥ ७५ ॥

**॥ इति श्रीस्कन्दपुराणे मानसखण्डे चाण्डालाख्यानं नाम चतुर्दशोऽध्यायः ॥१४॥**

---

७३. –c) ने1 °गुण° (→°गण°).

**पुष्पिकाः—अध्यायनाम—**ने2 चां* लाख्यायनं नाम.

# १५

दत्त उवाच ।

ततः स राक्षसो घोरः सह तै राक्षसैर्नृप ।
श्रुत्वा तस्य ऋषेर्वाणीं जगाम सरनायकम् ॥ १ ॥

वनादुपवनं राजन् गच्छन् स ब्रह्मराक्षसः ।
सह तै राक्षसगणैर्ददर्श हिमपर्वतम् ॥ २ ॥

तत्र संपूजयामास शिरांसि हिमपर्वते ।
शङ्करस्य महाराज शोभितानि हिमैः शुभैः ॥ ३ ॥

स तदा राक्षसो घोरो घोररक्षोगणैः सह ।
अवाप देवसदृशं देहं राजर्षिसत्तम ॥ ४ ॥

ततो दिव्येन देहेन दिव्यैः सहचरैः सह ।
जगाम मानसक्षेत्रं कैलासाधिविराजितम् ॥ ५ ॥

स तत्र मज्जयामास रक्षोभिर्नृपसत्तम ।
सह दिव्यैर्देवकान्तैः स्नर्नद्यां सुरराडिव ॥ ६ ॥

त्रिभिर्वर्षैर्महाराज सह यातुगणैः शुभैः ।
स तत्र तपयामास तपः परमदुःकरम् ॥ ७ ॥

पूजयन् शङ्करं शान्तं पार्वत्या सह संस्थितम् ।
निनाय कालं धर्मात्मा साक्षादिव शतक्रतुः ॥ ८ ॥

ततः कालेन महता तुषितः पार्वतीपतिः ।
दर्शनं दर्शयामास सह नन्दादिपार्षदैः ॥ ९ ॥

तमाद्यं तोषयामास स तदा राक्षसोत्तमः ।
गीर्भिः प्रणयपूर्वाभिर्वाष्पपूर्णाभिः शङ्करम् ॥ १० ॥

---



१. –a) ने2 वोरं (→घोरः). ८. –b) ने1 मह (→सह). ११. ने2.3.

राक्षस उवाच ।

नमो नमस्ते सरमध्यगाय
सुवर्णहंसाय महाप्रभाय ।
नन्दादिभिः पार्षदपूजिताय
रविप्रभायामितविक्रमाय ॥ ११ ॥

नमो नमस्ते हरिपूजिताय
देवीकलत्राय सदाशिवाय ।
कपालमालासुविराजिताय
ब्रह्मर्षिवृन्दैरभिपूजिताय ॥ १२ ॥

नमो नमस्ते हरिवल्लभाय
करालवक्त्राय शिवप्रदाय ।
सुघोरसंसारभयापहाय
देवैर्महेन्द्रादिभिः पूजिताय ॥ १३ ॥

नमो नमस्ते ज्वलनप्रभाय
जटाभिरामण्डितमस्तकाय ।
नागेन्द्रहारेण विराजिताय
त्रिशूलखट्वाङ्गधराय तुभ्यम् ॥ १४ ॥

नमो नमस्ते शशिसेविताय
सच्चिताभस्मविलेपनाय ।
वृषध्वजाय त्रिपुरान्तकाय
गङ्गाधरायान्धकनाशकाय ॥ १५ ॥

नमो नमः पिङ्गजटाधराय
चर्माङ्गवासाय कलाधराय ।
कालान्तकायाचलवासिताय
लिङ्गस्वरूपाय सरस्थिताय ॥ १६ ॥

दत्त उवाच ।

वचनं तस्य संश्रुत्य स्तुतिः प्रणयपूर्वकम् ।
तुषितः पार्वतीनाथो वचनं समुवाच ह ॥ १७ ॥

---

११. c–१२ b ⊙; –a) ने1 शर° (→सर°). –b) ने °हंताय (→°हंसाय).
१२. –d) ने1 ब्रह्मादि ब्रह्मर्षिभि पूजिताय.
१५. –a) ने1 शशिशेविताया (→शशिसेविताय). १६. –c) ने3 कलान्त° (→कालान्त°). १७. –b) ने3 स्तुति–(→स्तुतिः).

शिव उवाच ।

वरं वरय वै रक्ष त्वया सन्तोषितोऽस्म्यहम् ।
मयि त्रातरि भक्तानां न भयं विद्यते क्वचित् ॥ १८ ॥

राक्षस उवाच ।

नाहं स्वर्गं शून्यसंज्ञं वृणोमि
पदं महेन्द्रस्य तथा समस्तम् ।
त्वत्पादकञ्जं त्रिदिवेन्द्रपूज्यं
वृणोमि रक्षैः सह शङ्कर प्रभो ॥ १९ ॥
कालत्रये ते पदपङ्कजं प्रभो
त्यक्तुं न शक्नोमि सुरैः सुपूजितम् ।
पुराणशास्त्रैरखिलैः प्रकाशितं
ब्रह्मादिभिर्ब्रह्मसुतैरभिष्टुतम् ॥ २० ॥

दत्त उवाच ।

तथेत्युक्त्वा स भगवान् सह तेन नराधिप ।
जगाम कैलासगृहं सुरगन्धर्वपूजितम् ॥ २१ ॥
स तदा राजशार्दूल रुद्रकन्यानिषेवितम् ।
प्राप्य शिवगृहं कान्तं बभूव गणनायकः ॥ २२ ॥
घण्टाकर्णेति विख्यातः सेवितो यातुनायकैः ।
संस्तुतः सिद्धगन्धर्वैर्बभूव नृपसत्तम ॥ २३ ॥
यत्र यत्र महादेवः पूज्यते मानवोत्तमैः ।
तत्र तत्र महाराज घण्टाकर्णोपि पूज्यते ॥ २४ ॥
शासकः सैव राजर्षे मनुष्याणां दुरात्मनाम् ।
सह तै राक्षसगणैर्बभूव शिवमण्डले ॥ २५ ॥
इत्येतत् सरराजस्य माहात्म्यं कथितं मया ।
धर्मार्थमोक्षदं पुण्यं पुण्याख्यानसमन्वितम् ॥ २६ ॥
विस्तरेणानुपूर्व्या च महिमा कथिता मया ।
सरराजस्य राजर्षे किमन्यत् प्रष्टुमिच्छसि ॥ २७ ॥

---

१९. –c) ने2.3 शंकर (→शंकरं).
२०. –a) ने1* भो (→प्रभो). –d) ने3 °भिस्तुतम् (→°भिष्टुतम्).
२२. –c) ने1 प्राप्यारीव (→प्राप्य शिव–). २५. –a) ने1 से च (→सैव).

ब्रह्महा राक्षसो घोरो घोरैर्यातुगणैः सह ।
स यत्र नृपशार्दूल गणत्वमुपलब्धवान् ॥ २८ ॥

तस्याख्यानं मया प्रोक्तं सरराजस्य भूपते ।
यस्य संस्मरणात् सद्यश्चाण्डालोपि दिवङ्गतः ॥ २९ ॥

यश्चेदं शृणुयान् नित्यं वाचयेद् वा समाहितः ।
श्रियं च लभते नित्यं स स्वर्गान्नातिवर्तते ॥ ३० ॥

**॥ इति श्रीस्कन्दपुराणे मानसखण्डे सरमाहात्म्ये दत्तधन्वन्तरिसंवादे राक्षसाख्यायनो नाम पञ्चदशोऽध्यायः ॥ १५ ॥**

---

**पुष्पिका—पुराणनाम**—ने1 राक्षसाख्यायको नाम.

## १६

व्यास उवाच ।

मानसाख्यायनं श्रुत्वा काशिराजो महामतिः ।
माहात्म्यं सरतीर्थानां प्रष्टुमारेभिरे(?) ततः ॥ १ ॥

धन्वन्तरिरुवाच ।

त्वत्प्रसादान् महाभाग सरोवरकथां शुभाम् ।
श्रुत्वा मे जायते श्रद्धा पातकानां विनाशिनी ॥ २ ॥

माहात्म्यं श्रोतुमिच्छामि तीर्थानामृषिसत्तम ।
सरोवरजले पुण्ये संभवानां विशेषतः ॥ ३ ॥

तथा गङ्गाप्रवाहानां श्रोतसां चापि वर्णनम् ।
तथैव शिवलिङ्गानां संस्थितानां सरोवरे ॥ ४ ॥

गुहानां चापि माहात्म्यमाकराणां तथैव च ।
गुहासु शिवलिङ्गानां पूजितानां द्विजोत्तमैः ॥ ५ ॥

ऋषिपुण्याश्रमाणां च सङ्गमानांस्तथैव च ।
माहात्म्यं श्रोतुमिच्छामि तथा ब्रह्मशिरस्य च ॥ ६ ॥

विष्णुपादाङ्कितानां च स्थलानां ऋषिसत्तम ।
माहात्म्यं श्रोतुमिच्छामि ततः स्नानफलं शुभम् ॥ ७ ॥

व्यास उवाच ।

इति पृष्टः स धर्मात्मा काशीराजेन धीमता ।
दत्तः संयमिनां श्रेष्ठो वचनं समुवाच ह ॥ ८ ॥

दत्त उवाच ।

धन्योऽसि नृपशार्दूल यस्य ते ईदृशी मतिः ।
कथायाः सरराजस्य विद्यते भुवि पूजिता ॥ ९ ॥

मानसाख्यस्य तीर्थानां माहात्म्यं कथयामि ते ।
यदुक्तं देवदेवेन पार्वत्यै कृपया पुरा ॥ १० ॥

---

१. –a) ने1-3 महामति (→महामतिः). ६. b चरणात्परं ने2 पुस्तके ३a–६b यावद् द्विरावृत्तः. ७. –b) ने1 °सत्तमः (→°सत्तम). ८. –a) ने1 पृष्ठ, ने3 पृष्ठः (→पृष्टः). –c) ने1 संयामिनां, ने2 सयमिनां (→संयमिनां). ९. –c) ने1 कथायां (→कथाया [ : ]). १०. –d) ने1.2 पुरः (→पुरा).

कैलासशिखरासीनं देवदेवं जगत्पतिम् ।
प्रणम्य परया भक्त्या पप्रच्छ गिरिकन्यका ॥ ११ ॥

पार्वत्युवाच ।

देवदेव महादेव प्रपन्नार्त्तिहर प्रभो ।
भवता मानसजले वासो वै केन हेतुना ॥ १२ ॥
क्रियते हंसरूपेण तन्मां कथय वै प्रभो ।
कथं पुण्यजलं तत्र लोकैः सममुदाहृतम् ॥ १३ ॥
स्नात्वा तत्र महाभाग किं फलं लभ्यते ध्रुवम् ।
कानि तीर्थानि पुण्यानि पवित्राणि शुभानि च ॥ १४ ॥
के देवा मानसजले सन्ति देवेश शंस मे ।
कानि वै तव लिङ्गानि पूजितानि मनीषिभिः ॥ १५ ॥
गुहाः काः शैलराजस्य पूजिता दैवतैरपि ।
कथं चापोमयं देहं त्यक्त्वा स्वर्णमयं प्रभो ॥ १६ ॥
ध्रियते मानसजले भवता धातुरूपिणा ।
कथं तत्र प्रवाहश्च नदीनां समुपस्थितः ॥ १७ ॥
किं पुण्यं मनुजैस्तत्र प्राप्यते स्नानकारिभिः ।
किं तत्र शिवलिङ्गानां पूजनैर्लभ्यते फलम् ॥ १८ ॥
तीर्थानां नामधेयानि सन्ति कानि वदस्व वै ।
यदि कान्ताऽस्मि देवेश यद्यनुग्राह्यसि प्रभो ।
तर्ह्याख्यापय चार्वङ्गीं सुगुह्यमपि तत्त्वतः ॥ १९ ॥

दत्त उवाच ।

देव्याः समुदितां वाणीमाकर्ण्य नृपसत्तम ।
आलिङ्ग्य स तदा देवो वचनं समुवाच ह ॥ २० ॥

शिव उवाच ।

साधु साधु महाभागे शोभनं पृच्छसि प्रिये ।
लोकानां हितकर्त्तारं वचनं साधु भाषितम् ।
अवाच्यमपि वक्ष्यामि हिताय तव भामिनि ॥ २१ ॥

---

११. –a) ने1 °शिषरासीनं (→°शिखरासीनं). –c) ने2 परमा (→परया). १३. –b) ने2.3 पुण्यं जलं (→पुण्यजलं). –d) ने1.3 समनु° (→समम°). १४. –c) ने1 मुष्याति, ने2 पुष्पानि (→पुण्यानि). १७. –a) ने1 ध्रयते (→ध्रियते). १८. –a) ने1 पुन्य– (→पुण्यं). १९. –e) ने1 चावांनी, ने2 चार्वंगी (→चार्वङ्गीं).

महिम्ना मानसाख्यस्य तीर्थस्य च समन्वितम् ।
हंसैश्चाराधितः सोऽहं कृतादौ वरवर्णिनि ॥ २२ ॥
तपस्विभिः श्रुतयुतैर्मानसाख्यनिवासिभिः ।
तेषां प्रत्यक्षतां जातो वरदोऽहं वरेश्वरि ॥ २३ ॥
समारुह्य वृषं भद्रं नन्दिकेन सहास्मि वै ।
मया संभाषिता भद्रे शृण्वन्ति नियतव्रताः ॥ २४ ॥
ऊचुस्ते स्वर्णहंसस्य रूपेणास्मान् ररक्ष वै ।
मयूराणां सुरूपेण भीतान् योगपथागतान् ॥ २५ ॥
ररक्ष चारुरूपेण तैर्हि विज्ञापितोऽस्म्यहम् ।
तेषां संरक्षणार्थाय ततो धातुमयं वपुः ॥ २६ ॥
कृत्वा हंसस्वरूपेण मानसे क्रीडयाम्यहम् ।
तस्मादहं महाभागे भक्तानुग्रहकारकः ॥ २७ ॥
वसामि मानसक्षेत्रे त्वया सह न संशयः ।
शृणुष्व स्वर्णहंसस्य दर्शनान्मे फलं हि यत् ॥ २८ ॥
प्राप्नुवन्ति जनाः पुण्या देवपूज्या यतव्रताः ।
ये मां सुवर्णहंसस्य रूपेण शुभभाषिणि ॥ २९ ॥
पश्यन्ति देवसदृशा मानुषा मानुषोत्तमः (माः ?) ।
ते च पुण्या मम गृहे कुलकोटिसमन्विताः ॥ ३० ॥
वसन्ति दिननाथाभा यावदाहूतसंप्लवम् ।
स्वर्णहंसस्वरूपेण ये मां संभावयन्ति हि ॥ ३१ ॥
ते मया सह सायुज्यं प्राप्नुवन्ति न संशयः ।
स्वर्णहंसेति मे पूजां सरोवरजले शुभे ॥ ३२ ॥
ये कुर्वन्ति महाभागे ते मे सायुज्यमश्नुते ।
नाहं प्रत्यक्षतां भद्रे जनानां पापकारिणाम् ॥ ३३ ॥

---

२२. –a)ने$_1$ महिम्नं, ने$_{2.3}$ महिम्नां (→महिम्ना).–d) ने$_{1.3}$°वर्णिनी(→°वर्णिनि). २४. –c) ने$_{1.2}$ संभासिता (→संभाषिता). २५. –b) ने$_2$ ⋆रक्ष (→ररक्ष). २६. –a) ने$_2$ ⋆रक्ष (→ररक्ष). –b) ने$_2$ तैर्विज्ञातोस्म्यहं यदि. २७. –b) ने$_3$ मानस (→मानसे). –d) ने$_2$ °कारक (→°कारकः). ने$_3$. २८–२९c ⊙. २९. –d) ने$_1$ भूपेण (→रूपेण); ने$_2$ °मायिणि, ने$_3$ °मानीणी (→°भाषिणि). ३१. –a) ने$_1$ वदंति (→वसन्ति). ३२. –a) ने$_1$ सायोज्ये, ने$_2$ सायोज्यं (→सायुज्यं). –c) ने$_3$ मां (→मे). ३३. –b) ने$_1$ मया, ने$_2$ तेन (→ते मे); ने$_2$ सायोज्य° (→सायुज्य°).

चौराणां च शठानां च व्रजामि कुलघातिनाम् ।
तैरहं मानसजले पूजनीयो न संशयः ॥ ३४ ॥
पुनः प्रत्यक्षतां तेषां व्रजामि मम वल्लभे ।
तावत्पापानि लोकानां सन्ति देहगतानि वै ॥ ३५ ॥
यावन् मां मानसजले पूजयन्ति न मानिनि ।
यस्य मे मानसक्षेत्रे पूजनाद् वरर्वाणिनि ॥ ३६ ॥
वाजिमेधसहस्रस्य प्राप्नुवन्ति महत्फलम् ।
यत्र वै हंसरूपेण जलरूपधरां प्रियाम् ॥ ३७ ॥
आलिङ्गयामि सततं त्वामहं वरर्वाणिनि ।
तस्मान्नान्यं प्रपश्यामि स्थलं भूमण्डले क्वचित् ॥ ३८ ॥
यथा भूमण्डले देवि हरिरेव प्रपूज्यते ।
तथेदं मानसक्षेत्रे जलमेव प्रपूज्यते ।
यस्मिन् क्षेत्रे सुमनसा ब्रह्मणा चोपदेशिताः (?) ॥ ३९ ॥
मच्छिखामध्यगा गङ्गा विष्णुपादसमुद्भवा ।
मृणालतन्तुसदृशी सप्तब्रह्माण्डमध्यगा ॥ ४० ॥
अवतीर्णा महाभागे तस्मान्नान्यं वदामि ते ।
यत्राष्टधातवः पुण्या दृश्यन्ते वरर्वाणिनि ॥ ४१ ॥
मदंशसंभवाः शुद्धास्तस्मान् नान्यं वदामि ते ।
यत्र ब्रह्मा च विष्णुश्च तथैवाहं त्वया सह ॥ ४२ ॥
वसाम मानसक्षेत्रे तस्मात् कोन्यतमोऽधिकः ।
यत्र तीर्थान्यनेकानि लिङ्गानि विविधानि च ॥ ४३ ॥
सरित्सरांसि स्थानानि दृश्यन्ते हि पदे पदे ।
महिमानं महाभागे तस्य वर्षशतैरपि ॥ ४४ ॥
विस्तरेण महाभागे न वक्तुं शक्यते मया ।
तथाऽप्यहं महाभागे तीर्थानां पुण्यदायिनाम् ।
माहात्म्यं कथयिष्यामि विस्तरेण न संशयः ॥ ४५ ॥

---

३४. –c) ने2 सा महाराज (→मानसजले). ने1 शंशयः (→संसयः).
३६. –b) ने1.2 मानिनी (→मानिनि).

ने3. ३७–३८ b ⊙. ३७. –d) ने1 प्रिया (→प्रियाम्). ३८. –c) ने1 प्रपस्यामि (→प्रपश्यामि). ३९. –a) ने2 देवी (→देवि).

३९. ने1. cd ⊙.

४०. –d) ने1 °मध्यगाः (→°मध्यगा). ४१. –d) ने1 दृश्येते (→दृश्यन्ते).

अथातः संप्रवक्ष्यामि तीर्थानां देवपूजितम् ।
माहात्म्यं लोकपापघ्नं मुक्तिमार्गप्रदं शुभम् ॥ ४६ ॥
देवतीर्थं समारभ्य यावद्धंससरोवरम् ।
तावत्त्वां कथयिष्यामि शृणुष्व सुसमाहिता ॥ ४७ ॥
मानसाद् दक्षिणे भागे नाम्ना शम्भुगिरिः स्मृतः ।
तत्र लिङ्गान्यनेकानि सन्ति मे गिरिकन्यके ॥ ४८ ॥
तं दृष्ट्वा चातिशोभाढ्यं शम्भुलिङ्गसमन्वितम् ।
नराः शिवगृहं पुण्यं प्राप्नुवन्ति न संशयः ॥ ४९ ॥
ततः शेषेश्वरो देवो विद्यते वरवर्णिनि ।
तथा शेषी गुहा पुण्या नागमूर्तिसमन्विता ।
कपिलाद्यैर्मुनीन्द्रैश्च सेविता सुमनोहरा ॥ ५० ॥
त्रयस्त्रिंशत्समाख्यानि लिङ्गानि मम शोभने ।
पूजितानि भुजङ्गाद्यैर्धृतराष्ट्रसुतैरपि ॥ ५१ ॥
तत्रैव शेषचरणाच्छेषी नाम्ना सरिद्वरा ।
आविर्भूता सरिच्छ्रेष्टा गङ्गा त्रिपथगामिनी ॥ ५२ ॥
कर्क्कोटकादिभिर्नागैः सेविता सुमनोहरा ।
आविर्बभूव वै देवी उत्तरद्वारगामिनी ॥ ५३ ॥
रजताकरसंपूर्णा तथा सीसाकरान्विता ।
सेविता गणगन्धर्वैर्मूलत्रयसमन्विता ।
सङ्गमे मानसाख्यस्य सङ्गता सा सरिद्वरा ॥ ५४ ॥
बभूव सा सरिच्छ्रेष्ठा पातकानां प्रणाशिनी ।
शेषीमूले महाभागे शेषतीर्थमिति स्मृतम् ।
तत्र स्नात्वा च मनुजो विष्णोः सायुज्यमश्नुते ॥ ५५ ॥
ततः परं महाभागे तीर्थं वरुणसंज्ञकम् ।
तथा मूर्तिमयो देवो वरुणस्तत्र दृश्यते ॥ ५६ ॥
संपूज्य वरुणं देवं तत्र स्नात्वा महेश्वरि ।
प्राप्नुवन्ति नराः पुण्यं पुरन्दरगृहं शुभम् ॥ ५७ ॥
शेष्यास्तु दक्षिणे तीरे कामेशाख्यं शुभव्रते ।
संपूज्य कामदं तीर्थं स्नात्वा ब्रह्मपदं व्रजेत् ॥ ५८ ॥

---

४९. ने2 चापि (→चाति–). ५०. –b) ने1.3 °वर्णिनी (→°वर्णिनि).
५२. –b) ने1 नाम्नी (→नाम्ना).
५४. ने1. cd. ⊙.
५७b–५८c. ने2.3. ⊙.

ततस्तु सरितां श्रेष्ठा शेषी मोक्षप्रदा शुभा ।
सङ्गता मानसे क्षेत्रे मान्धातुः पथगामिनी ॥ ५९ ॥

देवतीर्थेति विख्यातं प्रयोगेनाप्यलङ्कृतम् ।
सर्वपापप्रशमनं देवगन्धर्वपूजितम् ॥ ६० ॥

शेषीमानसयोः सङ्गे देवतीर्थेति विश्रुतः ।
यः स्नाति तत्र मनुजो महेन्द्रपदमश्नुते ॥ ६१ ॥

येन स्नातं महादेवि देवतीर्थे विमुक्तिदे ।
तस्य देवाः शरीरस्था ब्रह्मविष्णुशिवादयः ॥ ६२ ॥

जलमध्ये महादेवो महेन्द्रेशेति विश्रुतम् ।
तस्य संपूजानादेव माहेन्द्रं पदमाप्नुयात् ॥ ६३ ॥

तत्र वै दृश्यते देवि शर्करा ताम्रसम्मिता ।
मुक्ताफलसमं तोयं तथैव ख्यायते भुवि ॥ ६४ ॥

सृष्टेरनन्तरं तत्र त्रयस्त्रिंशत्समन्वितैः ।
तपस्तप्तं महाभागे दैवतैर्वीतकल्मषैः ॥ ६५ ॥

पिण्डं दत्वा महाभागे त्रयस्त्रिंशत्कुलान्वितः ।
मानवो देवदेहो वै जायते नात्र संशयः ॥ ६६ ॥

तर्पयित्वा पितृंस्तत्र यमशासनसङ्गताम् ।
तारयेन् मानवश्रेष्ठः कुलकोटिसमन्वितान् ॥ ६७ ॥

तत्र वै स्नानमात्रेण नरो नारायणप्रियः ।
ऋणत्रयविनिर्मुक्तो जायते नात्र संशयः ॥ ६८ ॥

शृणुष्व मेनकातीर्थं ततो हस्तचतुष्टयम् ।
शिवमार्गप्रदं साक्षात् तीर्थद्वादशवेष्टितम् ॥ ६९ ॥

---

६०. -d) ने2.3 °सेवितम् (→°पूजितम्).
६१. -b) ने2 विश्रुतम् (→विश्रुतः). -d) ने1 °पथ° (→°पद°).
६२. -a) ने2 °देवीं (→°देवि). -d) ने1.2 ब्रह्मा (→ब्रह्म-). ६३. -b) ने1 विश्रुतः (→विश्रुतम्). -c) ने1 °त्तत्र (→°देव). -d) ने1 महेन्द्रपदमश्नुते.
६३. श्लोकात्परं ने1 अधिकम्—
'येन स्नानं महादेवि देवतीर्थे विमुक्तिदे ।' = ६२ ab
६४. -a) ने2 देवी (→देवि). -b) ने2 शक्तिरा (→शर्करा). ६७. -c) ने1 °श्रेष्ठः (→°श्रेष्ठाः). -d) ने1 °समन्विताम् (→°समन्वितान्).
६८. -b) ने3 °प्रिये (→°प्रियः). ६९. -b) ने2.3 °चतुःशतम् (→°चतुष्टयम्)

यत्र देवाप्सरा देवि मेनका चारुभाषिणी ।
स्नाति शुद्धे सरजले नायिकाभिः समन्विता ॥ ७० ॥

तत्र स्नात्वा नरो देवि मातुर्गर्भं न पश्यति ।
योगिभिश्चापि निस्तीर्णं योगमार्गनिषेविभिः ॥ ७१ ॥

यमतीर्थेति विख्यातं ततो हस्तशतान्तरे ।
सेवितं चित्रगुप्तेन तथान्यैर्यमनायकैः ॥ ७२ ॥

तत्र स्नानं महाभागे कर्त्तव्यं फलकाङ्क्षिभिः ।
मानुषैः पितृभक्तैश्च यममार्गनिराशिभिः ॥ ७३ ॥

कृत्वा श्राद्धं यमसरे पितॄणां दत्तमक्षयम् ।
याति तावन्महाभागे यावदिन्द्राश्चतुर्द्दश ॥ ७४ ॥

ततस्तस्योत्तरे भागे नाम्ना नलगिरिः स्मृतः ।
तस्योद्भवानां तीर्थानां माहात्म्यं शृणु पार्वति ॥ ७५ ॥

तस्मान् मानसरे देवि कपिला सरितां वरा ।
समागता सिद्धगणैः सेविता पापतारिणी ॥ ७६ ॥

नलपर्वतसंभूता निःसृता कपिलाश्रमात् ।
विधात्रा चोपदिष्टा सा स्वर्णपीतजला शुभा ॥ ७७ ॥

मान्धातुर्धनुषा देवि दर्शिताध्वा सरिद्वरा ।
आजगाम सरं शुद्धं जामदग्न्यनिषेवितम् ॥ ७८ ॥

मूले तस्याः स्थितो विष्णुनारदाद्यैर्महर्षिभिः ।
तथा देवगणैर्देवि गुहायां जगदीश्वरः ॥ ७९ ॥

उपास्यते महादेवि कृष्णं योगेश्वरं हरिम् ।
संपूजयति यो मर्त्यः स याति परमां गतिम् ॥ ८० ॥

ततः परं महाभागे कपिलस्याश्रमं शुभम् ।
वरुणाद्यैर्देवगणैः पूजितं सुमनोहरैः ॥ ८१ ॥

---

७०. –d) ने1.3 समन्विताः (ने3 °ता) (→समन्वितः). ७१. –a) ने1 यत्र (→तत्र). –d) ने2 °मार्गं (→°मार्ग–).

७२. –c) ने1 सेवितुं (→सेवितं).

७५. –d) ने2.3 पार्वती (→पार्वति). ७८. –b) ने1 सरोवरा (→सरिद्वरा).
८०. –a) ने2 उपास्योस्तेन, ने3 तस्योपास्ते (→उपास्यते). –b) ने1 कृस्नं, ने2 कृष्णे (→कृष्णं); ने2.3 योगीश्वरं (→योगेश्वरं). ८१. –d) ने2.3 सुमनोहरम् (→सुमनोहरैः).

कपिलाख्यं महत्तीर्थं तत्रैव वरवर्णिनि ।
शिलापञ्चकसंयुक्तं द्वात्रिंशत्क्रोशसंयुतम् ॥ ८२ ॥
विद्यते मृगशावाक्षि नलपर्वतमध्यगम् ।
इन्द्रादिभिर्देवगणैः पूजितं सुमनोहरैः ॥ ८३ ॥
स्नात्वा कपिलतीर्थे वै नरो ब्रह्मपदं शुभम् ।
समारुह्यति शक्राभः कुलकोटिसमन्वितः ॥ ८४ ॥
महर्षिकपिलं देवि संपूज्य विष्णुमन्दिरम् ।
प्रयाति पातकान् हित्वा कुलकोटिसमन्वितः ॥ ८५ ॥
ततस्तु दक्षिणे तीरे कपिलायाः शुभव्रते ।
काञ्चनस्याकरैर्युक्ता स्मराख्या गिरिकन्दरा ॥ ८६ ॥
पातालसदृशा पुण्या शिवलिङ्गसमन्विता ।
विद्यते मृगशावाक्षि वाणेन परिसेविता ॥ ८७ ॥
तत्र वाणेश्वरो देवो पूज्यते दितिसूनुभिः ।
तथैव दानवेशाद्यैर्दितिजैश्चोपदेशितैः ॥ ८८ ॥
संपूज्य तत्र वाणेशं मानवः शाङ्करं पदम् ।
प्रयाति नात्र सन्देहः शिवकन्यानिषेवितः ॥ ८९ ॥
वाणतीर्थं महादेवि कपिलाया ततः परम् ।
विद्यते मृगशावाक्षि तत्र स्नात्वां दिवं व्रजेत् ॥ ९० ॥
पदे पदे सु तीर्थानि कपिलाया शिवप्रिये ।
सन्ति देवर्षिपूज्यानि मानवैः प्रार्थितानि च ॥ ९१ ॥
ततस्तु कपिला देवि शुभं मानसरोवरम् ।
संमिलद् ऋषिपूज्यं वै जामदग्न्याश्रमे शुभम् ॥ ९२ ॥
जामदग्न्यं महत्तीर्थं तत्र मानसरे शुभे ।
यः स्नाति मानवः सम्यक् स याति हरिमन्दिरम् ॥ ९३ ॥
जामदग्न्यसमं तीर्थं नास्ति मानसरे क्वचित् ।
यत्र रामो जामदग्न्यरवाप(?) चिरजीविताम् ॥ ९४ ॥

---

८२ ने2.3. ab ⊙. ८५. –a) ने1.3 महर्षी– (→महर्षि). –d) ने2 °शतान्विते (→°समन्वितः).

८६. -c) ने1 युक्तां (→युक्ता). ८७. –b) ने1.2 °समन्वितां(ने2 °तः) (→°समन्विता). –d) ने1 °सेविताः, ने3 सेवित : (→°सेविता). ८८. –b) ने1 पूज्यन्ते (→पूज्यते). ९२. –b) ने3 शुभे (→शुभम्). ९४. –a) ने2 °महत् (→°समं).

श्रीदेव्युवाच ।

कथं स देवदेवेश जामदग्न्यः प्रतापवान् ।
अवाप चिरजीवित्वं प्राप्य भूमण्डलं शुभम् ॥ ९५ ॥

ईश्वर उवाच ।

शृणुष्व त्वं महाभागे जामदग्न्यो यथाऽभवत् ।
यथानेन सुपुण्येन संप्राप्तं चिरजीवनम् ॥ ९६ ॥

तथा त्वां कथयिष्यामि चरितं विस्मयापहम् ।
मोक्षमार्गप्रदं पुण्यं विष्णुभक्तिप्रदायकम् ॥ ९७ ॥

कृतान्तरे महादेवि जामदग्निस्तोपनिधिः ।
विष्णुमाराधयामास खेदितो हैहयैर्नृपैः ॥ ९८ ॥

कालेन तं तदा देवो दर्शयामास स्वं वपुः ।
कलिकल्मषहन्तारं दुर्दर्शं दैवतैरपि ॥ ९९ ॥

ततस्तं कथयामास वरयेति वरं शुभम् ।
दुःप्राप्यं देवगन्धर्वैः शिवाद्यैर्मानवैः किल ॥ १०० ॥

सोवाच तं तदा देवि वरेण्यं वरदं प्रभुम् ।
वृणोम्यहं त्वत्सदृशं सुतं क्षत्रान्तकारकम् ॥ १०१ ॥

तथेत्युक्त्वा स भगवान् तत्रैवान्तरधीयत ।
ततः स ऋषिमुख्यो वै बभूव स्वस्थमानसः ॥ १०२ ॥

ततः कालेन महता सुतं क्षत्रान्तकारकम् ।
पारगं वेदविद्यानां प्राप विष्णोरनुग्रहात् ॥ १०३ ॥

ततस्तं लक्ष्मणोपेतं बालं राजीवलोचनम् ।
आख्यया रामनामं वै चकार स शुभव्रते ॥ १०४ ॥

स रामो मृगशावाक्षि वर्द्धमानो दिने दिने ।
चकार विविधं पुण्यं तपोभिः कायशोषिभिः ॥ १०५ ॥

ततः क्षत्रियभूपालान् जामदग्न्यः प्रतापवान् ।
जघान स परान् वाणैर्जमदग्निनियोजितः ॥ १०६ ॥

---

९५. –c) ने$_{2.3}$ °जीवत्वं (→°जीवित्वं). –d) ने$_2$ °मण्डले (→°मण्डलं). ९६. –c) ने$_2$ यथा तेन (→यथानेन). –d) ने$_2$ °जीवतम् (→°जीवनम्).

९७. ने$_2$. ९७c–९८a ⊙. –b) चरितं विस्मयावहम्. ९८. ने$_2$ a ⊙. –b) ने$_{2.3}$ तपस्तेपे (→तपोनिधिः). ९९. –a) ने$_2$ देशे (→देवो). १०३. –b) ने$_3$ क्षेत्रान्त° (→क्षत्रान्त°). १०४. –c) ने$_1$ सागैव (?) (→नामं वै) १०६. –d) ने$_1$ जमदग्निमियोजितैः.

स हत्वा सर्वभूपालान् क्षत्रहीनां वसुन्धराम् ।
चकार निजबाणौघै रुधिरौघपरिप्लुतान् ॥ १०७ ॥

एवं त्रिसप्तकं कृत्वा स रामो शिववल्लभे ।
उत्ससर्ज धरां शुद्धां सशैलवनकाननाम् ।
ब्राह्मणेषु महाभागे नदीभिः समलङ्कृताम् ॥ १०८ ॥

ब्रह्मयत्तां धरां कृत्वा स रामो गिरिकन्यके ।
समुद्रं याचयामास वासमात्रं नदीपतिम् ॥ १०९ ॥

रामं न जानयामास समुद्रः सरितां पतिः ।
अवतीर्णं महाबाहुं जमदग्निगृहे प्रभुम् ॥ ११० ॥

मरुं कर्तुं सरिन्नाथं स रामस्तदनन्तरम् ।
नदीभिः पूरितं क्षारं चकार मतिमुत्तमाम् ॥ १११ ॥

समुद्रस्तं तदा देवि कृताञ्जलिपुटः स्वयम् ।
प्रार्थयामास क्षत्रारिं कार्यार्थे भुवि संस्थितम् ॥ ११२ ॥

सोवाच तं महादेवि गिरा सूनृतया हरिम् ।
प्रार्थितं देवगन्धर्वैं ऋषिभिश्चापि संस्तुतम् ॥ ११३ ॥

वयं हि मन्दमतयो न जानीम खलाः प्रभुम् ।
अनुग्रहोऽयं भवता कृतं चात्र न संशयः ॥ ११४ ॥

त्वामहं कथयिष्यामि खलनिग्रहकारकम् ।
उपायं चिन्त्यतामाशु स्ववासार्थं जगत्पते ॥ ११५ ॥

शरमेकं समाधाय चापे स्वर्लोकपूजिते ।
तेन मां कुरु वै राम षष्टियोजनदूरगम् ॥ ११६ ॥

---

१०७. –b) ने$_{2}$ वसुन्धरान् (→वसुन्धराम्).

१०९. –a) ने$_{3}$ क्षणमात्रं (→वासमात्रं). ११०. ने$_{1.2}$ ⊙. १११. –a) ने$_{1}$ भरूं (→मरुं). –d) ने$_{1}$ उत्तमम् (→उत्तमान्). १०९–१११ श्लोकानां स्थाने ने$_{2}$ पाठः

ब्रह्मयत्तां धरां कृत्वा स रामो गिरिकन्यके ।
समुद्रं याचयामास [स] रामस्तदनन्तरं ।
नदीभिः पूरितं क्षारं चकार मतिमुत्तमाम् ॥

११२. –b) ने$_{1}$ °पुरः (→°पुटः). –c) ने$_{2}$ छत्राणि (→क्षत्रारिं). ११४. –b) ने$_{1}$ जानाम (→जानीम). ११५. –d) ने$_{3}$ स्ववासार्थे (→स्ववासार्थं).

तमिङ्गिलझषाकीर्णं जलजन्तुविराजितम् ।
तेनोपायेन वासाय दास्यामि वसुधां प्रभो ।
यावच्छरेण संस्पृष्टं स्थलं तावत् त्यजाम्यहम् ॥ ११७ ॥
समुद्रस्य च तां वाणीं श्रुत्वा रामः प्रतापवान् ।
चापे शरं समाधाय क्षत्रशोणितपारगः ॥ ११८ ॥
चकार सरितां नाथं षष्टियोजनदूरगम् ।
तिमिङ्गिलझषाकीर्णं वरुणालयशोभितम् ॥ ११९ ॥
प्राप्य दिव्यं स्थलं देवि स रामः सरितां पतेः ।
चकार वासं धर्मात्मा गोत्रजैर्ब्राह्मणैः सह ॥ १२० ॥
तत्रारोप्य तदा देवि यज्ञस्तम्भान् सुशोभितान् ।
उत्सृज्य कौङ्कणं देशं ब्राह्मणेभ्यो महामते ॥ १२१ ॥
तपसे कृतसङ्कल्पः पूतं मत्वा भुवस्तलम् ।
तदुत्तरेण मार्गेण जगाम हिमपर्वतम् ॥ १२२ ॥
तत्र शिरांसि मे देवि पूजयित्वा सरोवरम् ।
आजगाम पूतजले कपिलासङ्गमे शुभे ॥ १२३ ॥
स मामाराधयामास प्राप्य मानसरोवरम् ।
द्वादशाब्दानि वै देवि पूजयन् मां वरप्रदम् ॥ १२४ ॥
तुष्टश्चाहं ततो देवि दर्शयामास दर्शनम् ।
जामदग्न्याय रामाय त्वया सह न संशयः ॥ १२५ ॥
तुष्टाव मां तदा देवि जामदग्न्यो महातपाः ।
गिरा सूनृतया चापि वाष्पगद्गदपूर्णया ॥ १२६ ॥
तुष्टस्तस्मै सुयोग्याय दास्यामीति विचिन्त्य च ।
वरं देवमनुष्याणां दुःप्राप्यं मम वल्लभे ॥ १२७ ॥
वरयेति मया प्रोक्तो वरं वरद पूजिते ।
अजरामरतां लोके ददस्वेति उवाच ह ॥ १२८ ॥
अंशं वैकुण्ठदेहे वै संन्यस्याऽवनिमण्डले ।
तपामि न हि सन्देहो ददस्वामरतां प्रभो ॥ १२९ ॥

१२०. –b) ने1.2 पते (→पतेः). –c) ने1 चरवासं (→चकार). –d) ने1 सहः (→सह) १२१. –b) ने2 सुशोभनान् (→सुशोभितान्). –c) ने1.3 उत्सर्ज्य (→उत्सृज्य) –d) ने1.3 महात्मनाः (→महामते).

१२३. –c) ने1 °जलं (→°जले). १२४. –c) ने1 देवेशि (→वै देवि). १२७. –d) ने3 शिव (→मम).

इत्युक्तस्तेन रामेण तथेत्युक्त्वाऽप्यहं तदा ।
प्रत्याजगाम कैलासं रुद्रकन्यानिषेवितम् ॥ १३० ॥

मत्तः प्राप्य वरं सौम्यं रामोऽपि स्वगृहं शुभम् ।
जगाम द्विजमुख्यैश्च सेवितं सुमनोहरम् ॥ १३१ ॥

ततः कालेन महता पुण्ये रघुकुले हरिः ।
अवतारांशभागेन रक्षःकुलविनाशकृत् ॥ १३२ ॥

श्रुत्वा रामं तदा देवि संभूतं राघवे कुले ।
सोऽगमद् राजशार्दूल हन्तुं दाशरथिं प्रभुम् ॥ १३३ ॥

सोऽवदन् मृगशावाक्षि रामं दाशरथिं ततः ।
रामोऽहं भूतले ख्यातो न हि रामा अनेकशः ॥ १३४ ॥

त्वामहं निहनिष्यामि तस्माच्छब्दविलोपकम् ।
किन्तु मे छत्रहन्तारं चापं समधिरोपय ॥ १३५ ॥

न त्वहं वै शरोरत्नं भूमौ निःपातयामि वै ।
इत्युक्त्वा तं तदा देवि ददौ रत्नविराजितम् ॥ १३६ ॥

स्वं धनुः श्वाससंयोगैर्मिश्रितं वीरभूषणम् ।
समारोप्य तदा रामो जामदग्न्यमुवाच ह ॥ १३७ ॥

त्वदंशसंयुतं चापं मयि सम्यगुपस्थितम् ।
मया चारोपितं चापि पश्यस्व ससमाहितः ॥ १३८ ॥

इत्युक्त्वा तं तदा रामो वाणं चापि ना(नि ?)धाय च ।
पुनरेतान्तरगतं वचनं समुवाच ह ॥ १३९ ॥

मया सोदाहृतं चापि तथ्यं कर्तुं वचो हरिः ।
रघूणां न शरा ब्रह्मन् यान्ति चात्र निरर्थकाः ॥ १४० ॥

तस्मादेकां गतिं तेऽद्य नाशयामि न संशयः ।
तमुवाच तदा दीनो जामदग्न्यो महेश्वरि ॥ १४१ ॥

नाहं स्वर्गगतिं पुण्यां व्रजामि रघुनन्दन ।
तपामि भूतले पुण्ये गिरिकाननशोभिते ॥ १४२ ॥

---

१३४. –d) ने2.3 न हि रामादनेकशः.

१३५. –a) ने2 तुहनिष्यामि (→निहनिम्यामि). –c) ने2.3 छत्रनिहन्तारं (→छत्रहन्तारं). १३६. –a) ने3 हि (→वै). ने3. १३८-१३९. ⊙. १४२. –c) ने1 नयामि (→तपामि). १४२. –e) ने1 तीर्थैश्चापि च (→सुतीर्थैश्चापि).

सुतीर्थैश्चापि संकीर्णे वृक्षराजविराजिते ।
जामदग्न्यवचः श्रुत्वा स रामो दीनवल्लभः ।
चिच्छेद स्वर्गतिं तस्य प्रार्थितं मानवोत्तमैः ॥ १४३ ॥

तस्य चापस्य मार्गेण तद्देहाद्वैष्णवं ततः ।
तेजो रामशरीरे वै प्रविवेश महेश्वरि ॥ १४४ ॥

विसृज्य वैष्णवं तेजो जामदग्न्यो यतव्रतः ।
चचार वसुधां सर्वां सशैलवनकाननाम् ॥ १४५ ॥

इत्येतत् कथितं भद्रे रामाख्यानं सुविस्तरम् ।
तेन वै चिरजीवित्वं यथा प्राप्तं तथा मया ॥ १४६ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे रामाख्याने मानसतीर्थमाहात्म्यं नाम षोडशोऽध्यायः ॥ १६ ॥**

---

१४५. –a) ने1 विसर्ज्य (→विसृज्य). –cd) ने2 सर्वे*शैल° (→सर्वां सशैल°).
१४६. –d) ने1 तेन सुचिरजीवत्वं.

**पुष्पिका—अध्यायनाम**—ने1 नाम स तीर्थमाहात्म्यं नाम.

## १७

दत्त उवाच ।

इत्युक्त्वा तां प्रियां राजन् देवदेवो महेश्वरः ।
माहात्म्यं कथयामास तीर्थानां पुण्यदायिनाम् ॥ १ ॥

शिव उवाच ।

पुरा कृतयुगे देवि जामदग्न्यसरोवरे ।
मृता गृध्रा वडाश्चैव गता ब्रह्मपुरं प्रति ॥ २ ॥

तत्रैव जामदग्न्येशं हरं ये पूजयन्ति हि ।
ते व्रजन्ति महादेवि गृहं मे देवसेवितम् ॥ ३ ॥

ततः परं महातीर्थं काकतीर्थमिति स्मृतम् ।
यत्र स्नात्वा चतुस्त्रिंशत्काका ब्रह्मपदं गताः ॥ ४ ॥

परं शृगालतीर्थं वै संस्मृतं गिरिकन्यके ।
यत्र सर्वे फेरवकाः स्नात्वा शिवपुरं गता ॥ ५ ॥

भगचक्षुःकरं तीर्थं परं ते व्याहृतं मया ।
यत्रेन्द्रो गौतमीशापाद्विमुक्तो निजमन्दिरम् ॥ ६ ॥

समागतः सिद्धगणैस्त्रिदशैश्चापि मोदितः ।
संप्राप्य शतनेत्राणि बृहस्पतिरनुग्रहात् ॥ ७ ॥

ततः पुलोमजातीर्थं विद्यते वरवर्णिनि ।
यत्र स्नात्वा महेन्द्रं वै पतिं प्राप पुलोमजा ॥ ८ ॥

परं हि पुष्पभद्रायाः सङ्गमोऽस्ति वरेश्वरि ।
यत्र वै रघुनाथस्य तीर्थमस्ति न संशयः ॥ ९ ॥

पुष्पभद्रा सरिच्छ्रेष्ठा नलपर्वतसम्भवा ।
जगाम मानससरं ब्रह्मणा चोपदेशिता ॥ १० ॥

गौतमस्य ऋषेर्यज्ञे समाहूता महर्षिभिः ।
पूर्ववाहा सरिच्छ्रेष्ठा भद्रेशपदसम्भवा ॥ ११ ॥

---

१. -d) ने$_{3}$ °दायिनाम् (→°दायिनाम्). २. -a) ने$_{2}$ देवी (→देवि). -c) ने$_{2.3}$ मृतां (→मृता); ने$_{2}$ वाडविडशि, ने$_{3}$ वाद्रा विडाश् (→गृध्रा वडाश्). ४. -b) ने$_{1}$ स्फुटम् (→स्मृतम्). ८. -d) ने$_{1}$ प्राप्य (→प्राप). ९ -a) ने$_{2}$ °भद्रायां (→°भद्रायाः). -c) ने$_{2.3}$ तत्र (→यत्र). ११. -c) ने$_{2.3}$ °वाह्नो (→°वाहा).

मान्धातुर्दर्शिताध्वा सा जगाम मानसं सरम् ।
मूले तस्या स्थितो विष्णुर्भद्राया सह वल्लभे ।
प्लक्षादिभिर्नगैश्चैव सेवितो वरदो विभुः ॥ १२ ॥

भद्रया सहितं विष्णुं ये पश्यन्ति यतव्रताः ।
ते देवि मानुषे लोके भद्राहीनां भवन्ति हि ॥ १३ ॥

ततस्तु पुष्पभद्राया वामभागे महेश्वरि ।
देवभद्रा सरिच्छ्रेष्टा पातकानां विनाशिनी ॥ १४ ॥

जगाम मानसं क्षेत्रं देवगन्धर्वपूजितम् ।
महेन्द्रस्याश्वमेधे वै समाहूता सरिद्वरा ।
गुरुणा देवकार्यार्थे तत्रैव नलपर्वते ॥ १६ ॥

सेविता सिद्धगन्धर्वैः विष्ण्वङ्गुष्ठसमुद्भवा ।
मान्धातुर्दर्शितपथा ययौ मानसरोवरम् ॥ १६ ॥

तस्या मूले त्रयस्त्रिशद् देवाः सन्ति महेश्वरि ।
लिङ्गरूपधराः सर्वे महेन्द्रेण समन्विताः ॥ १७ ॥

पूजनाद् देवलिङ्गानां नराः स्वर्गगतिं प्रति ।
व्रजन्ति त्रिकुलैः सार्द्धं देवकन्यानिषेविताः ॥ १८ ॥

ततस्तु देवभद्रायां तीर्थानि शृणु पार्वती ।
यानि श्रुत्वा महाभागा व्रजन्ति मम मन्दिरम् ॥ १९ ॥

तीर्थं त्रिभुवनख्यातं सौरभं नाम विद्यते ।
यत्र सा सुरभी देवी दृश्यते वरवर्णिनि ॥ २० ॥

तावद्धि पितरः सर्वे मानवानां दुरात्मनाम् ।
वसन्ति नरके घोरे यावत् पिण्डं न सौरभे ॥ २१ ॥

तीर्थे ददन्ति कुलजा गोत्राख्यापनसंयुतम् ।
ततः परं न पश्यन्ति घोरं यमगृहं शुभे ॥ २२ ॥

परं तु देवभद्रायां तुङ्गतीर्थमिति स्मृतम् ।
स्वमातुर्गमनात् यत्र मुक्ति तुङ्गप्रजापतिः ॥ २३ ॥

तत्र स्नात्वा महाभागे मानवाः पापकारकाः ।
अगम्यागमनात् पापान् मुक्ता मुक्तिं व्रजन्ति हि ॥ २४ ॥

---

१४. –a) नें2 पुष्य॰ (→पुष्प॰). २१. नें2 नरकं (→नरके).

ततस्तु देवभद्रायां मध्ये मानसरोवरे ।
तथैव पुष्पसरितोर्मध्ये शिवगणप्रिये ॥ २५ ॥

रामतीर्थमिति ख्यातं प्रयागेनाप्यलङ्कृतम् ।
शतजन्मार्जितानां हि पातकानां प्रणाशनम् ॥ २६ ॥

सेवितं पुष्पभद्रायाः जलैः पुण्यैः सुशोभनैः ।
तथाकारं द्रवद्विजैर्हंसैश्चापि निषेवितम् ॥ २७ ॥

प्रयागाल्लक्षगुणितं फलं तत्र हि विद्यते ।
तस्मान् नान्यं प्रपश्यामि स्थलं भूमण्डले क्वचित् ॥ २८ ॥

रथाश्वा यत्र रामेण त्यक्त्वा दिवि गतेन हि ।
दृश्यतेऽत्र न सन्देहः पुण्ये मानसरोवरे ॥ २९ ॥

तस्मान् नान्यतमं तीर्थं नास्ति मानसरोवरे ।
यत्र विष्णुमहेशाद्याः स्थापिता राघवेन हि ॥ ३० ॥

पिण्डं दत्वा च मतिमान् रामतीर्थे महेश्वरि ।
तारयित्वा पितृगणान् तथा मातामहान् नरः ॥ ३१ ॥

स याति विष्णुभवनं कुलकोटिशतान्वितः ।
वसित्वा कल्पमेकं वै तत्र भूमण्डलेश्वरी ।
पुनर्भूमण्डलं सर्वं प्राप्य राजा भवेदिह ॥ ३२ ॥

तत्र रामेश्वरं देवि संपूज्य मनुजोत्तमाः ।
प्रयान्ति ते विष्णुगृहं पुनरावृत्तिदुर्लभम् ॥ ३३ ॥

रामतीर्थादधो भागे बलितीर्थमिति स्मृतम् ।
मोक्षदं स्थिरचित्तानां धर्ममार्गप्रदायकम् ॥ ३४ ॥

तत्रैव बलिना देवि वाजिमेधत्रयं शुभम् ।
कृत्वा संपूर्णतां नीतं समाप्तं सरत्नदक्षिणैः ॥ ३५ ॥

तत्र स्नात्वा नरो देवि वाजिमेधफलं महत् ।
प्राप्नोति देवगन्धर्वैर्दुःप्राप्यं मानवैरपि ॥ ३६ ॥

बलिना पूजितं तत्र सन्ति विष्णोः पदत्रयम् ।
पद्माङ्कुशादिरेखाढ्यं सेवितं नारदादिभिः ॥ ३७ ॥

---

२५. –e ने2 3 पुष्पा (→पुष्प–). २७. –b) ने1 सुशोभितैः (→सुशोभनैः)
३२. –b) ने1 °समन्वितः (→°शतान्वितः). –c) ने3 हि (→वै).
३५. –c) ने1 संपूर्णता (→संपूर्णतां). –d) ने2.3 समाप्तं रत्नदक्षिणैः.
३७. –b) ने3 विष्णुः (→विष्णोः).

तान् संपूज्य नराः सर्वे तद्विष्णोः परमं पदम् ।
प्राप्नुवन्ति महाभागे कुलकोटिसमन्विताः ॥ ३८ ॥

ततः परं महाभागे कपितीर्थमिति स्मृतम् ।
गान्धर्वपददं पुण्यं सेवितं सिद्धनायकैः ॥ ३९ ॥

यत्र तीर्थे महाभाग हनुमान् नाम वानरः ।
प्राप्य नागायुतबलं कमाराध्य यतव्रते ॥ ४० ॥

तत्र स्नात्वा नरो देवि बलं प्राप्नोति दुर्जयम् ।
तथैव चाक्षयं वासो मम लोके न संशयः ॥ ४१ ॥

ततः परं महातीर्थं बालितीर्थेति विश्रुतम् ।
मनःशिलाकरैः युक्तं ताम्रशर्करशोभितम् ॥ ४२ ॥

तत्र वालीश्वरं देवं संपूज्य मनुजाधमाः ।
प्राप्नुवन्ति सुशोभाढ्यं गृहं मे वरवर्णिनि ॥ ४३ ॥

परं तीर्थशतैर्युक्तं ध्रुवतीर्थमिति स्मृतम् ।
सप्तर्षिसेवितं पुण्यं मोक्षमार्गप्रदर्शकम् ॥ ४४ ॥

तत्र स्नात्वा ध्रुवो देवि जगाम हरिमन्दिरम् ।
दुःप्राप्यं देवगन्धर्वैः किमुतान्यैर्जनैः शुभैः ॥ ४५ ॥

तत्र स्नात्वा नरो देवि ध्रुवस्य पदवीं शुभाम् ।
प्राप्नोति पितृभिः सार्द्धं त्यक्त्वा पापान् सरोवरे ॥ ४६ ॥

ततः परं महातीर्थं वागीशाख्यं महेश्वरि ।
षोडशाख्याभिः पुण्याभिर्मातृकाभिः सुसेवितम् ॥ ४७ ॥

तथा षोडशमातॄणां तीर्थैश्चापि समन्वितम् ।
अणिमाद्याभिः पुण्याभिरष्टसिद्धिभि[ः] सेवितम् ॥ ४८ ॥

पिण्डं दत्त्वा महाभागे तीर्थे वागीश्वराह्वये ।
नरः पितॄन् समुत्तीर्णान् करोति शिववल्लभे ॥ ४९ ॥

वासमात्रेण वै देवि तीर्थे वागीश्वराह्वये ।
मया सह नरो देवि सायोज्यमिह चाश्नुते ॥ ५० ॥

तत्र वागीश्वरं देवं मातृकाभिर्निषेवितम् ।
संपूज्य मानवो लोके पूज्यते मम लिङ्गवत् ॥ ५१ ॥

---

३९. –d) ने₁ °नामकैः (→°नायकैः).
४०. –d) ने₁ मामा° (→कमा°). ४५. –c) ने₂ दुःप्राप्य (→दुःप्राप्यं).

परं भूतान्तकं नाम तीर्थमस्ति वरेश्वरि ।
तत्र स्नात्वा च मनुजः कुलानां तारयेच्छतम् ॥ ५२ ॥
परं गोशतदं नाम तीर्थमस्ति न संशयः ।
देवर्षिमानवानां च सेवितं सुमनोहरम् ॥ ५३ ॥
गोसहस्रप्रदानेन तत्र राजा विदूरथः ।
मुक्तः पापान् महाभागे दुहितृगमनोद्भवात् ॥ ५४ ॥
ततस्तु पश्चिमे भागे नाम्ना गौरिगिरिः स्मृतः ।
सिद्धाश्रमैर्बहुविधैर्महौषधिसमन्वितः ॥ ५५ ॥
तस्योत्तरे महाभागाश्च(च?)न्द्रभागा सरिद्वरा ।
बभूव राजहंसैः सा सेविता सुमनोहरा ॥ ५६ ॥
ययौ सा सरितां श्रेष्ठा मानसाख्यं सरोवरम् ।
मान्धात्रा दर्शितपथा विधात्रा चोपदेशिता ॥ ५७ ॥
पुरा चन्द्रमसो यज्ञे समाहूता महर्षिभिः ।
सनकाद्यैर्महाभागे ऋत्विजैश्चापि दीक्षितैः ॥ ५८ ॥
आविर्भूता सरिच्छ्रेष्ठा मत्कपर्दविनिःसृता ।
जगाम मानसक्षेत्रं यत्र सा वसुधा हृता ॥ ५९ ॥
तस्या मूले स्वयं ब्रह्मा ध्याति विश्वं चराचरम् ।
गौतमाद्यै ऋषिश्रेष्ठैः पूजितो विश्वकृद् विभुः ॥ ६० ॥
तत्र संतर्पितेनैव पितॄणां दत्तमक्षयम् ।
याति यावद् दिनकरो तपति स्वर्गमण्डले ॥ ६१ ॥
ब्रह्मणः पूजनात् सद्यो नरो ब्रह्मपदं शुभम् ।
आरुह्यति महाभागे कुलकोटिसमन्वितः ॥ ६२ ॥
दक्षिणे चन्द्रभागाया गुहा चन्द्रवती स्मृता ।
तत्र चन्द्रमसो मूर्तिर्दृश्यते ऋषिभिः सह ॥ ६३ ॥
तस्य सम्पूजनाद् सद्यो विमानमधिरुह्य वै ।
प्राप्नोति चन्द्रभुवनं नरस्त्रिशतकुलान्वितः ॥ ६४ ॥
ततस्तु चन्द्रभागायां शशतीर्थमिति स्मृतम् ।
यत्र स्नात्वा शशः सम्यक् शशिसायोज्यतां गतः ॥ ६५ ॥
परं वै चन्द्रभागायां बिन्दुमाधवसंज्ञकम् ।
तीर्थमस्ति महाभागे मुक्तिद्वारमिवापरम् ॥ ६६ ॥

---

५५. –b) ने1 नाम्नां (→नाम्ना) ५७. –c) ने2 माधाता (→मांन्धात्रा).
५९. –b) ने2 मत्कपर्दी° (→मत्कपर्द°).
६४. –c) ने3 °भवनं (→°भुवनं). ६६. –c) ने2.3 महाभागा (→महाभागे).

विन्दुमाधवतीर्थे वै स्नात्वा वैकुण्ठमन्दिरम् ।
प्राप्नोति मानवः सम्यग् यावदाहूतसंप्लवम् ॥ ६७ ॥

विन्दुमाधवसंज्ञं वै सम्पूज्य शिववल्लभे ।
हरेः सायुज्यतां याति पुत्रदारान्वितो नरः ॥ ६८ ॥

परं चापि कुबेराख्यं तीर्थमस्ति वरेश्वरि ।
तत्र स्नात्वा च मनुजो धनवान् जायते भुवि ॥ ६९ ॥

ततः पुण्या[ः] सरिच्छ्रेष्ठा मानसाख्यं सरोवरम् ।
सम्मिलन्ति मुखैः पुण्यैः सेविता शशकैर्मृगैः ॥ ७० ॥

तत्र वै मृगशावाक्षि लिङ्गं चण्डेश्वराह्वयम् ।
पूजयित्वा मम पुरे वसन्ति मनुजोत्तमाः ॥ ७१ ॥

ततस्तु चन्द्रभागायाः सङ्गमे त्रिदशेश्वरि ।
सितातीर्थेति विख्यातं तीर्थसप्तकशोभितम् ॥ ७२ ॥

यत्र वै वसुधा देवि सितारूपेण शोभना ।
प्रविष्टा मानसक्षेत्रं मान्धात्रा परिखेदिता ॥ ७३ ॥

तस्मान्नान्यतमं तीर्थं त्रिषु लोकेषु भामिनि ।
न पश्यामि मनुष्याणां पातकान्तकरं शुभम् ॥ ७४ ॥

तत्र पिण्डप्रदानेन मनुष्याणां शुभात्मनाम् ।
यमालयगता वापि तथाऽसद्योनिसङ्गताः ॥ ७५ ॥

आब्रह्मस्तम्भ (स्तम्ब?)पर्यन्ता देवर्षिपितृमानवाः ।
तृप्यन्ति पितरः सर्वे मातृमातामहादयः ॥ ७६ ॥

सितातीर्थे महादेवि सितेशाख्यो महेश्वरः ।
विद्यते देवगन्धर्वैः पूजितः सुमनोहरः ॥ ७७ ॥

तस्य सम्पूजनात् सद्यो मानुषा मे गृहं शुभम् ।
प्राप्नुवन्ति न सन्देहो रुद्रकन्यानिषेविताः ॥ ७८ ॥

ततः परं तु वाणाख्यं तीर्थं त्रिदशसेवितम् ।
तत्र स्नात्वा नरो देवि महेन्द्रभवनं व्रजेत् ॥ ७९ ॥

ततः सारसतीर्थं वै वाग्भूतं नरकान्तकम् ।
शीतपीतजलैः पुण्यैः शोभितं सुमनोहरम् ॥ ८० ॥

---

६९. –c) ने1 तु (→च). ७२. –b) ने2 संगमं (→सङ्गमे).
७९. –a) ने2.3 चाणक्यं (→वाणाख्यं). –b) ने1 °सेविताम् (→°सेवितम्).

यत्र वै सारसाः सर्वे श्रुत्वा सरकथां शुभाम् ।
स्नात्वा गन्धर्वभुवनं गता गान्धर्वसेविताम्(?) ॥ ८१ ॥

तत्र स्नात्वा नरो देवि संतर्प्य:च पितॄन् स्वकान् ।
याति गन्धर्वभुवनं गन्धर्वजनसेवितम् ॥ ८२ ॥

परं चण्डेश्वरं नाम तीर्थमस्ति सुपुण्यदम् ।
तत्र स्नात्वा द्विजवधात् पातकाद् वै प्रमुच्यते ॥ ८३ ॥

तथा चण्डेश्वरं देवं तत्र सम्पूज्य वै प्रिये ।
नरा मम पुरं रम्यं प्राप्नुवन्ति न संशयः ॥ ८४ ॥

ततो गौरिगिरेः पुण्यात् परभागा यतव्रते ।
सम्भवा सरितां श्रेष्ठा ब्रह्मणा चोपदेशिता ॥ ८५ ॥

सप्तब्रह्माण्डमध्योत्था पतिता गौरिपर्वते ।
वरुणस्य महायज्ञे समाहूता गिरा सुतैः ॥ ८६ ॥

सूर्यवंशप्रदीपेन दर्शिताध्वा सरिद्वरा ।
जगाम मानसं क्षेत्रं विश्वनाथशिवप्रिये ।
हिमज(जैस्)तोयविभवैर्वाहिता मन्दवाहिनी ॥ ८७ ॥

मूले तस्याः सुशोभाढ्या विश्वनाथशिला स्मृता ।
स्वर्णादिधातुखचिता हिमसीकरपूरिता ॥ ८८ ॥

उपपातकसंयुक्ता महापापान्वितापि हि ।
तां दृष्ट्वा मानवा देवि शिलां वर्णविचित्रताम् ।
प्राप्नुवन्ति हि सायोज्यं मया सह न संशयः ॥ ८९ ॥

ततस्तु विश्वनाथायां श्येनतीर्थमिति स्मृतम् ।
यत्रेन्द्रः श्येनरूपं च शिविजेतु(तुं?) चकार ह ॥ ९० ॥

तत्र श्येनस्वरूपेण मघवान् दृश्यते स्वयम् ।
तथाग्निना कपोतेन दीनरूपकृतेन च ॥ ९१ ॥

तत्र सम्पूज्य देवेन्द्रमग्निना सह मानवः ।
प्राप्नोति देवभुवनं यावदिन्द्राश्चतुर्दश ॥ ९२ ॥

परं तु विश्वनाथायां तीर्थं नारदसंज्ञकम् ।
पर्वताद्यैर्ऋषिवरैः सेवितं सुमनोहरम् ॥ ९३ ॥

---

८१. –a) ने1 तत्र (→यत्र). –c) ने3 °भवनं (→भुवनं). –d) ने1 °सेवितम् (→°सेविताम्). ८२. –c) ने2 °भुवने (→°भुवनं). ८३. –a) ने1 चंद्रेश्वरं (→चण्डेश्वरं). ८४. –a) ने1 देवि (→देवं). –b) ने3 प्रभो (→प्रिये). ८९. –a) ने2.3 उपपातकथं युक्ता. ९१. –d) ने3 दीप° (→दीन°).

नारदीयह्लदे स्नात्वा दृष्ट्वा स्वर्णमयं हरम् ।
प्राप्नोति मम सायोज्यं नरः शिवगणप्रिये ॥ ९४ ॥

ज्वालाख्यं वटकाख्यं च देवाख्यं च ततः परम् ।
तीर्थेष्वेतेषु संस्नात्वा नरो मम पदं व्रजेत् ॥ ९५ ॥

पश्चिमे विश्वनाथाया गुहा काञ्चनशोभिता ।
विद्यते मृगशावाक्षि दशद्वारैर्विराजिता ॥ ९६ ॥

तत्राहं मृगरूपेण त्वया सह वरेश्वरि ।
वसामि नात्र सन्देहः सत्यं ते व्याहृतं मया ॥ ९७ ॥

तस्मान् नान्यतमं स्थानं प्रियं मे विद्यते क्वचित् ।
यत्र देवास्त्रयस्त्रिंशन् मामुपासन्ति संयताः ॥

तत्र मां प्राप्य गिरिजे पूजयन्ति नरा हि मे ।
कुलकोटिशतैर्युक्ता व्रजन्ति मम मन्दिरे ॥ ९९ ॥

परं हि विश्वनाथाया दक्षिणे वरवर्णिनि ।
वैद्यनाथेति विख्यातो दिवोदासेन सेवितः ॥ १०० ॥

तस्य संपूजनात् सद्यः क्लेशहीना भवन्ति हि ।
पुत्रदारान्विताः सर्वे जनाः सत्यं मयेरितम् ॥ १०१ ॥

विश्वनाथा सरिच्छ्रेष्ठा मानसाख्यं सरोवरम् ।
सम्मिलन् मृगशावाक्षि श्वानतीर्थे न संशयः ।
श्वानतीर्थं समासाद्य तिलोदैर्यः प्रतर्प्पयेत् ॥ १०२ ॥

पितॄन् वै पितरस्तस्य ब्रह्मलोकमवाप्नुयुः ।
यत्र श्वानं पुरस्कृत्य सिंहाद्या मे गृहं शुभम् ।
स्नात्वा वै दिव्यदेहेन प्राप्ताः पार्षदसेविमम् ॥ १०३ ॥

तत्रैव विश्वनाथस्य पूजां कृत्वा यतव्रते ।
व्रजन्ति मानवाः शुद्धं गृहं त्रैलोक्यपूजितम् ॥ १०४ ॥

घण्टाकर्णेन तत्रैव पूजितोऽहं न संशयः ।
ततो मे पूजनाद् देवि गणत्वमुपलब्धवान् ॥ १०५ ॥

ततः परं महातीर्थं घण्टाकर्णाह्वयं स्मृतम् ।
तत्र स्नात्वा द्विजवधान्मुच्यते नात्र संशयः ॥ १०६ ॥

---

९४. –c) ने1 सायोज्य (→सायोज्यं). ९५ –a) ने3 ज्वालाख्यां वटकाख्यां च.
९६. –a) ने3 °नाथाय (→°नाथाया).
१००. –a) ने3 °नाथाय (→°नाथाया).

परं वै गणनाथाख्यं तीर्थमस्ति यतव्रते।
गणेशं तत्र संपूज्य स्नात्वा सरजले शुचौ।
सान्निध्यं मम वै नित्यं प्राप्नुवन्ति नराः शुभाः ॥ १०७ ॥

ततस्तु सरितां श्रेष्ठा शारदा पापनाशिनी।
वामाङ्गे संस्थिता देवि ब्रह्मणः परमेष्ठिनः ॥ १०८ ॥

एकांशेन सरिद्भूता मुनीनां हितकारणात्।
ब्रह्मणा चोपदिष्टा सा प्रार्थिता गौतमादिभिः।
अवतीर्णा सरिच्छ्रेष्ठा सुपुण्ये गौरिपर्वते ॥ १०९ ॥

सूर्यान्वयप्रदीपेन दर्शिताध्वा सरिद्वरा।
जगाम मानसक्षेत्रे ऋषीणामाश्रमे शुभे ॥ ११० ॥

शारदाया महन्मूले ब्रह्मा सप्तर्षिभिः सह।
राजते मृगशावाक्षि तथान्यैर्देवतागणैः ॥ १११ ॥

तत्र संपूज्य धातारमृषिभिः सह वै प्रिये।
नरो ब्रह्मपदं पुण्यमधिरुह्यति सत्वरम् ॥ ११२ ॥

दृश्यते यत्र वै ब्रह्मा ऋषिभिः सह सुव्रते।
तत्रैव मानसक्षेत्रे पिण्डं दातुं प्रभुर्महान् ॥ ११३ ॥

मोहाद् गयायां दद्याद्यः स पितॄन् पातयेत् स्वकान्।
लभते च ततः शापं पितृणां नात्र संशयः ॥ ११४ ॥

ततः परं महाभागे शारदायां सुशोभनम्।
वसिष्ठाख्यं महातीर्थं अरुन्धत्या निषेवितम् ॥ ११५ ॥

तत्र स्नात्वा महातीर्थे वसिष्ठं मुनिसत्तमम्।
सम्पूज्य सह पत्न्या वै नरो ब्रह्मपदं शुभम्।
प्राप्नोति देवगन्धर्वैः प्रार्थितं सुमनोहरम् ॥ ११६ ॥

तत्रैव दक्षिणे भागे गुहा सुबहुशोभिता।
वसिष्ठाश्रमसंयुक्ता ताम्रधातुविराजिता ॥ ११७ ॥

तपति तत्र वै देवि वसिष्ठः सह भार्यया।
ऋषिभिश्चोपकर्माभिस्तथा शिष्यैः समन्वितः ॥ ११८ ॥

---

१०७. –a) ने2 °नाथाख्ये(→°नाथाख्यं).
११३. –d) ने2 दानं (→दातुं); ने1 प्रभुः पुमान् (→प्रभुर्महान्).
११५ –c) ने2 3 विशिष्टाख्यं (→वसिष्ठाख्यं).

तस्य संदर्शनात् सद्यो मानवो मानवेश्वरि ।
प्राप्नोति मम सायुज्यं यावदाहूतसंप्लवम् ॥ ११९ ॥

ततः परं महाभागे शारदायां कलापकम् ।
तीर्थमस्ति सुशोभाढ्यं ह्रदपञ्चकसंयुतम् ॥ १२० ॥

मज्जनात् तत्र वै सम्यक् नरो ब्रह्मपदं शुभम् ।
प्राप्नोति देवगन्धर्वैः पूजितं सुमनोहरम् ॥ १२१ ॥

ततस्तु शारदामध्ये तीर्थमस्ति महेश्वरि ।
वकतीर्थेति विख्यातं षष्टिक्रोशसमन्वितम् ॥ १२२ ॥

तत्र स्नात्वा पितॄणां च श्राद्धं कृत्वा महेश्वरि ।
त्रिसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥ १२३ ॥

ततस्तु शारदा पुण्या तरङ्गैर्व्याकुलीकृता ।
जगाम सा सरिच्छ्रेष्ठा पुण्यं मानसरोवरम् ॥ १२४ ॥

फेनिला फेनबहुला हंसैः कारण्डवैर्वकैः ।
सेविता सरितां श्रेष्ठा मुखैर्बहुभिः संयुता ॥
सम्मिलन् मानसक्षेत्रं सेविता अप्सरोगणैः ॥ १२५ ॥

सङ्गमे शारदायास्तु शृणुष्व परमेश्वरि ।
स्नात्वा नरो विष्णुगृहं प्राप्नोति कुलकोटिभिः ॥ १२६ ॥

शारदेशं हरं तत्र सम्पूज्य मनुजेश्वरि ।
मानवो मम सायुज्यमायाति नहि संशयः ॥ १२७ ॥

ततस्तु मानसक्षेत्रे प्रभातीर्थमिति स्मृतम् ।
सेवितं देवगन्धर्वैर्भानुभक्तैस्तथैव च ॥ १२८ ॥

यत्र भानोः प्रभा देवि पतिता पत्निहेतवे ।
तत्र स्नात्वा च मनुजो भानुना सह मोदते ॥ १२९ ॥

परं पुण्यतमं तीर्थं संज्ञाख्यं वरवर्णिनि ।
यत्र संज्ञा भानुभयादश्विनीरूपमास्थिता ॥ १३० ॥

तत्र स्नात्वा महादेवि नरो याति शुभां गतिम् ।
ततो मानसरे पुण्ये गणगन्धर्वसेविते ॥ १३१ ॥

---

११९. –c) ने1.2 सायोज्यं (→सायुज्यं). –d) ने3 °भूत° (→°हूत°). १२२. –d) ने1 °समन्वितम् (→°समन्वितः). १२७. –c) ने1 सायोज्य° (→सायुज्य ). १२९. –b) ने3 पति° (→पत्नि°). –c) ने3 स (→च).

धर्मार्थकाममोक्षाणां हेतुभूतं महेश्वरि ।
बलतीर्थेति विख्यातं पूजितं द्विजपुङ्गवैः ॥ १३२ ॥

यत्र स्नात्वा बलो देवि मुक्तो द्विजवधात् किल ।
तत्र स्नात्वा महाभागे कुलकोटिसमन्वितः ।
गोस्त्रीद्विजवधान् मुक्तः प्राप्नोति हरिमन्दिरम् ॥ १३३ ॥

ततस्त्वावर्तविपुलैः संक्षोभितजलाशये ।
पुष्करीभूतकल्लोलैः सेविते सुमनोहरे ॥ १३४ ॥

सुगम्भीरजले पुण्ये घनगम्भीरनिःस्वने ।
कैलासगृहउत्तीर्णैः सेवितं सिद्धनायकैः ॥ १३५ ॥

तथा मारीचप्रमुखैः सेवितं ऋषिनायकैः ।
सुपुण्ये मानसक्षेत्रे तीर्थं वामनसंज्ञकम् ॥ १३६ ॥

अदितीन्द्रादिभिर्देवैः पूजितं मनुजेश्वरि ।
यत्र वै वामनो भूत्वा कृत्वोपेन्द्रत्वतां पुरा ॥ १३७ ॥

समुत्ततार लोकेशो भासाभासितभूतलः ।
चिकीर्षन् देवताकार्यं जगाम मधुसूदनः ॥ १३८ ॥

तत्र विष्णोर्महादेवि पद्भिश्चैवाङ्किता मही ।
पद्माङ्कुशादिरेखाभिरङ्कितैर्देवपूजितैः ॥ १३९ ॥

शिलाया बाहुविस्तीर्णा तत्र मह्यां महेश्वरि ।
विराजन्ते सुपुण्याख्या विष्णोः पादैः सुपुजिताः ॥ १४० ॥

तान् वै सम्पूज्य मनुजाः कुलकोटिसमन्विताः ।
व्रजन्ति विष्णुभवनं पूजिताः फाल्गुनादिभिः ॥ १४१ ॥

नान्योपायं प्रपश्यामि मनुष्याणां दुरात्मनाम् ।
विष्णुपादं विना देवि पातके मज्जितात्मनाम् ॥ १४२ ॥

सरोवरतटस्थायां शिलायां मनुजेश्वरि ।
यावन्न मानवः सम्यक् पदं विष्णोः प्रपश्यति ॥ १४३ ॥

---

१३२ –b) ने3 हेतुभूते (→हेतुभूतं); ने3 महेश्वरं (→महेश्वरि). १३५. –d) ने1 सेविते (→सेवितं). १३७. –a) ने1 अस्तीन्दाद्यादिभिर्देवैः. –d) ने1 कृष्णो° (→कृत्वो°). १३८. –c) ने1 विकीर्षं देवताकार्यं. १३९. –d) ने1 °पूजिते (→°पूजितैः) १४०. –a) ने1 शिलायां (→शिलाया); ने1 बहु° (→बाहु°). १४१. –b) ने3 °शतान्विताः (→°समन्विताः).

तावद् भ्रमति संसारे दारुणे दुःखसङ्कुले ।
यावन्न मानसक्षेत्रे दृष्टं विष्णुपदत्रयम् ॥ १४४ ॥

संसारे भ्राम्यमाणानां बद्धानां कर्मरज्जुभिः ।
मोचनं मानसक्षेत्रे विद्यते तत्पदत्रयम् ॥ १४५ ॥

विष्णुपदाङ्कितां भूमिं स्पृष्ट्वापि मनुजाधमाः ।
आरुह्यन्ति दिवं देवि किमु तान् पूजनादतः ॥ १४६ ॥

स्नात्वा तत्र महादेवि तीर्थे वामनसंज्ञके ।
त्रिसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥ १४७ ॥

तत्र पिण्डप्रदानेन यावज्जलकणा दिवि ।
तावद् वर्षाणि पितरो मोदन्ते देववद् दिवि ॥ १४८ ॥

ये पुण्या दक्षिणाशायां सन्ति तीर्थाण्यनेकशः ।
वारुण्यां दिशि तीर्थानि तथैव परमेश्वरि ॥ १४९ ॥

प्राधान्येन सुपुण्यानि मयाख्यातानि साम्प्रतम् ।
मानसाख्यस्य सरसो नदीभिः सह सुव्रते ॥ १५० ॥

प्राधान्यनामयुक्तानि मम लिङ्गान्वितानि च ।
किमन्यत् पुण्यमाख्यानं प्रष्टुमिच्छसि सुव्रते ॥ १५१ ॥

**॥ इति श्रीस्कन्दपुराणे मानसखण्डे तीर्थमाहात्म्यो नाम सप्तदशोऽध्यायः ॥ १७ ॥**

---

१४४. -d) ने$_2$ दृष्टां, ने$_3$ दृष्ट्वा (→दृष्टं). १४५. -c) ने$_{2.3}$ °क्षेत्रे (→°क्षेत्रं). १४६. -a) ने$_2$ भूमीं, ने$_3$ भूमी (→भूमिं). १४८. -d) ने$_2$ दिति (→दिवि). १५१. -a) ने$_1$ प्रधान्य° (→प्राधान्य°). -b) ने$_{1.2}$ लिंगानि तानि (→लिङ्गान्वितानि).

## १८

दत्त उवाच ।

इति शिववचः श्रुत्वा गौरी गौरेन्दुसन्निभा ।
पुनः पप्रच्छ देवेशं प्रफुल्लमुखपङ्कजा ॥ १ ॥

देव्युवाच ।

धन्याऽस्म्यनुगृहीताऽस्मि यत्त्वया भाषिताऽस्म्यहम् ।
लोकनाथेन देवेश धर्ममार्गप्रदायिना ॥ २ ॥

अथान्यदपि पृच्छामि माहात्म्यं धर्मदर्शकम् ।
मानसोत्तरभागे वै तीर्थानां परमेश्वर ॥ ३ ॥

तथैव पूर्वभागे वै तीर्थानां वर्णनं प्रभो ।
नदीनां चैव माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ ४ ॥

ईश्वर उवाच ।

श्रृणुष्वेकमना देवि कथयामि न संशयः ।
यथा तीर्थं यथा लिङ्गं यथा ज्ञानतमं शुभम् ॥ ५ ॥

मानसस्योत्तरे भागे कैलासाख्यो महागिरिः ।
यत्र मे विद्यते वासस्त्वया सह महेश्वरि ॥ ६ ॥

अधित्यकासु पुण्यासु तस्याद्रेर्वरवर्णिनि ।
सेविता बहवः पुण्या मानसाख्यस्य वीचिभिः ॥ ७ ॥

त्रयस्त्रिंशच्छताख्याता पातालसदृशा गुहाः ।
तासु मे विद्यते वासस्त्वया सह न संशयः ॥ ८ ॥

तासां मध्ये महाभागा निर्झरैर्बहुभिर्युता ।
सेविता सिद्धगन्धर्वैस्तथा विद्याधरोरगैः ॥ ९ ॥

---

१. –b) ने1 गौरीन्दु° (→गौरेन्दु°). –d) ने1 °पङ्कजः (→°पङ्कजा). २. –d) ने1 °प्रदायिनी (→°प्रदायिना). ३. –d) ने2 परमेश्वरो (→परमेश्वर). ६. –b) ने1 कैलाशाख्यो (→कैलासाख्यो). –d) ने1 महेश्वरी (→महेश्वरि). ७. –a) ने1 अधित्यगासु (→अधित्यकासु). –b) ने1.2 वरवर्णिनी (→वरवर्णिनि). –d) ने2 वीतिभिः (→वीचिभिः). ८. –b) ने2.3 पातल° (→पाताल°).

सप्तब्रह्माण्डनिर्भेद्यसंगूढा मम मस्तके ।
स्वधाभासा स्वधापूर्णा शिवदा च स्वधाशिनाम् ॥ १० ॥
पीनकुङ्कुमलिप्ताभिः सुस्तनीभिः सुसेविता ।
विद्याधराणां पुण्याभिर्मृगनेत्राभिर्नारिभिः ॥ ११ ॥
तथैरावणमातङ्गकपोलान्निःसृतैर्मदैः ।
विमिश्रितजला पुण्या विधात्रा चोप्देशिता ॥ १२ ॥
सूर्यवंशप्रदीपेन धनुषाग्रेण वै शुभे ।
दर्शिताध्वा सरिच्छ्रेष्ठा नाम्ना मन्दाकिनी सरित् ॥ १३ ॥
जगाम सा सरिच्छ्रेष्ठा पुण्यं मानसरोवरम् ।
सा भद्रे मानवे लोके भद्रेति ख्यायते सदा ॥ १४ ॥
जगाम मानसं क्षेत्रं दक्षिणाभिमुखी सरित् ।
निर्झरैर्बहुलैर्युक्ता ये पश्यन्ति यतव्रताः ।
ते यान्ति ब्रह्मभवनं पुत्रपौत्रसमन्विताः । १५ ॥
भद्रामानसयोर्मध्ये ये मज्जन्ति महेश्वरि ।
तेषां मे भवने वासो विद्यते परमेश्वरि ॥ १६ ॥
तत्र भद्रेश्वरं नाम मम लिङ्गं महेश्वरि ।
सम्पूज्य मानवः सम्यङ् मम लोके महीयते ॥ १७ ॥
तत्र तीर्थे महादेवि नाम्ना राजा भगीरथः ।
स्वर्गतिं सागराणां वै र(अ?)न्विच्छन् प्रार्थयन् हरिम् ॥ १८ ॥
द्वादशाब्दानि वै देवि तपस्तेपे सुदुष्करम् ।
द्वादशाब्दे व्यतीते तु ददर्श स हरिं प्रभुम् ॥ १९ ॥
शङ्खचक्रगदाशार्ङ्गश्रीवत्साङ्केन शोभितम् ।
वनमालापरीताङ्गदिव्यकुण्डलशोभितम् ॥ २० ॥
तं दृष्ट्वा स तदा राजा वाष्पव्याकुलितेन्द्रियः ।
तुष्टाव विभुं शान्तं दिव्यकौशेयवाससम् ॥ २१ ॥

---

१०. -c) ने$_2$ °भागा (→°भासा).

१४ ने$_2$. ⊙. १५. -a) ने$_1$ मानसक्षेत्रं (→मानसं क्षेत्रं). -d) ने$_1$ यतव्रता (→यतव्रताः). -e) ने$_1$ °भुवनं (→°भवनं) १६. -b) ने$_1$ महेश्वरी (→महेश्वरि). -c) ने$_3$ भवनं (→भवने). -d) ने$_{1.2}$ परमेश्वरी (→परमेश्वरि). १७ -b) ने$_1$ लिङ्ग-(→लिङ्गं); ने$_{1.2}$ महेश्वरी (→महेश्वरि). १८. -c) ने$_1$ स्वर्गतिः (→स्वर्गतिं). १९. -b) ने$_1$ सुदुस्तरं (→सुदुष्करं). २०. -a) ने$_2$ °शाङ्ग° (→°शार्ङ्ग-). -d) ने$_2$ °दिव्यं (→°दिव्य-).

भगीरथ उवाच ।

नमस्ते देवदेवेश शङ्खचक्रगदाधर ।
शार्ङ्गपाणे नमस्तेऽस्तु गदाधर नमोऽस्तु ते ॥ २२ ॥

ईश्वर उवाच ।

इति तद्वचनं श्रुत्वा विष्णुः प्रीतमना भवत् ।
वरं वरय प्रोवाच भगवान् केशिसूदनः ॥ २३ ॥

सोवाच तं तदा देवि सागराणां परां गतिम् ।
ततस्तं दर्शयामास गत्यर्थे सरितां वराम् ॥ २४ ॥

निजपादसमुद्भूतां गङ्गां मन्दाकिनीं शुभाम् ।
अनया सागराः सर्वे तरिष्यन्ति न संशयः ॥ २५ ॥

व्रजस्व त्वां प्रदास्यामि मार्गेणानेन वै नदीम् ।
तया वै सागराः सर्वे तरिष्यन्ति न संशयः ॥ २६ ॥

इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयत ।
राजाऽपि तां सरिच्छ्रेष्ठां दृष्ट्वा देवेन दर्शिताम् ॥ २७ ॥

निमज्य मानसक्षेत्रे परां प्रीतिमवाप्तवान् ।
जगाम न्यस्य तं प्रीतो यत्र जम्बुसरोवरः ॥ २८ ॥

सा भद्रा सरितां श्रेष्ठा विष्णुपादसमुद्भवा ।
कपर्दिमध्यसम्भूता कैलासात् पतिता भुवि ॥ २९ ॥

विमानमध्यगैर्देवैः सेविता भुवनेश्वरि ।
सम्मिलन् मानसक्षेत्रं तोयफेनैर्विवर्द्धिता ॥ ३० ॥

भद्राया महिमानं हि अपि ब्रह्मा शतक्रतुः ।
वक्तुं वर्षशतैर्देवि किमन्यदितरे जनाः ॥ ३१ ॥

भद्रामूले महादेवि ब्रह्मविष्ण्वादिरर्चितम् ।
जागर्ति मम लिङ्गं वै देवगन्धर्वपूजितम् ॥ ३२ ॥

---

२५. –b) ने$_1$ गङ्गा(→गङ्गां); ने$_1$ मन्दाकिनी(→मन्दाकिनीं). २६. –a) ने$_1$ ददस्यामि (→प्रदास्यामि). २७. –b) ने$_2$ °धीयते (→°धीयत). –d) ने$_1$ इष्ट्वा (→दृष्ट्वा). २८. –c) ने$_1$ जगामान्यस्य तं प्रीतो. २९. –c) ने$_1$ कपर्दो°; ने$_2$ कचपर्दि° (→कपर्दि°). –d) ने$_3$ पतितं (→पतिता). ३०. –b) ने$_1$ भुवनेश्वरी (→भुवनेश्वरि). –d) ने$_{1.2}$ विवर्धिताः (→विवर्धिता). ३१. –a) ने$_2$ भद्राया महि***. ३२. –c) ने$_2$ लिङ्गानां (→लिङ्गं वै).

दृष्ट्वा वै मानवः सम्यङ् महापुरुषलक्षणम् ।
गणेशस्य पदं पुण्यं प्राप्नोति नहि संशयः ॥ ३३ ॥

भद्रामध्ये ततो देवि क्रौञ्चतीर्थमिति स्मृतम् ।
तत्र स्नातो महादेवि नरो मम पदं व्रजेत् ॥ ३४ ॥

भद्राया निर्झरान्ते वै पुष्करी नाम वै गुहा ।
स्थानं तत्र महादेवि पद्मनाभस्य शोभनम् ॥ ३५ ॥

तत्र सुप्तो जगन्नाथः पुरा कृतयुगे हरिः ।
बभूव मृगशावाक्षि शेषाङ्के नहि संशयः ॥ ३६ ॥

मार्कण्डेयेन मुनिना नारदेन महात्मना ।
पूजितश्च महादेवि सुष्वाप स श्रिया सह ॥ ३७ ॥

तं दृष्ट्वा मानवा देवि अपि पातककोटिभिः ।
विलिप्तापि जरां त्यक्त्वा भवन्ति शतजीविनः ॥ ३८ ॥

ततः परं महाभागे भद्रायां योजनात्परे ।
अष्टधातुमयं लिङ्गं स्वर्णबिन्दुभिः शोभितम् ॥ ३९ ॥

मदीयं देवगन्धर्वैः पूजितं सुमनोहरम् ।
विद्यते चाति शोभाढ्यं पूजितं सिद्धनायकैः ॥ ४० ॥

तल्लिङ्गस्य चतुर्थे वै भागे त्वमसि शोभने ।
गौरीश्वरेति तल्लिङ्गं वदन्ति मुनिसत्तमाः ॥ ४१ ॥

गौरीश्वरं महादेवं सम्पूज्य मनुजेश्वरि ।
प्राप्नोति विभवं लोके प्रसादान्नात्र संशयः ॥ ४२ ॥

ततस्तु दक्षिणे देवि भद्रायाः सुमहागुहा ।
कलपीनाम पुण्याख्या हरिमन्दिरसन्निभा ॥ ४३ ॥

तत्र त्रिनेत्रसंज्ञं वै लिङ्गं मे वरवर्णिनि ।
सम्पूज्य मानवः सम्यग् अश्वमेधफलं लभेत् ॥ ४४ ॥

ततस्तु वामभागे वै मृत्युञ्जयमहेश्वरम् ।
सम्पूज्य मृगशावाक्षि मृत्युं जयति दुर्जयम् ॥ ४५ ॥

---

३५. –b) ने1 पुष्करि (→पुष्करी).

४१. –c) ने3 तं लिङ्गं (→तल्लिङ्गं). ४३. –c) ने1 कलापी माम (?), ने3 कलयी नाम (→कलपी नाम).

४४. –b) ने1 वरवर्णिनी, ने2 वरवर्णिभिः (→वरवर्णिनि). ४५. –d) ने1 दुर्जय (→दुर्जयम्).

ततस्तु दक्षिणे देवि कालीनाम महागुहा ।
तत्र कालीश्वरं देवं सम्पूज्य मम मन्दिरम् ।
प्राप्नोति सुरगन्धर्वैः पूजितं सुमनोहरम् ॥ ४६ ॥

ततो वामे महादेवि भवानीशं महेश्वरम् ।
गत्वा सम्पूज्य मनुजो जायते मम वल्लभः ॥ ४७ ॥

ततो भद्रह्लदे पुण्ये कपिलेशं महेश्वरम् ।
शिलामध्ये नाभिमयं गत्वा सम्पूज्य मानवः ।
प्राक्तनानि हि पापानि भस्मसात्कुरुते शुभे ॥ ४८ ॥

ततो गत्वा महादेवि भद्रायाः पश्चिमे दिशि ।
महेशं कालिकेशाख्यं सम्पूज्य शिवमाप्नुयात् ॥ ४९ ॥

ततो भद्रह्लदाः पञ्च ख्यायन्ते भुवि दुर्लभाः ।
येषु स्नात्वा महामात्रो महेन्द्रस्य महात्मनः ॥ ५० ॥

बभूव सारथिर्देवि मातलिः कमलेक्षणे ।
तेषां हि नामधेयं वै शृणुष्व सुसमाहिता ॥ ५१ ॥

कालीह्लदं कालह्लदं ततः कल्पह्लदं शुभम् ।
ततः पद्मह्लदं पुण्यं ततो हरिह्लदं स्मृतम् ॥ ५२ ॥

तेषु स्नात्वा नरो देवि सन्तर्प्य च पितॄन् स्वकान् ।
प्रयाति विष्णुभुवनं पुनरावृत्तिदुर्लभम् ॥ ५३ ॥

ततस्तु सा सरिच्छ्रेष्ठा कैलासगिरिसम्भवा ।
सम्मिलन् मानसं क्षेत्रं राजहंसनिषेवितम् ॥ ५४ ॥

तत्र स्नात्वा नरो देवि सन्तर्प्य च पितॄन् स्वकान् ।
कुबेरसदृशं संपत्प्राप्नोति नहि संशयः ॥ ५५ ॥

तत्र भद्रेश्वरं नाम लिङ्गं मे वरवर्णिनि ।
सम्पूज्य मानवः सम्यङ् नैवाभद्रं प्रपश्यति ॥ ५६ ॥

---

४६. –e) ने$_{3}$ प्राप्नोसि (→प्राप्नोति). ४७. –a) ने$_{1}$ महादेवी (→महादेवि). ४८. –a) ने$_{1}$ भद्रा° (→भद्र°). –f) ने$_{1}$ शिवे (→शुभे). ५०. –a) ने$_{1.2}$ भद्रा (→भद्र–). –b) ने$_{3}$ वल्लभाः (→दुर्लभाः). –c) ने$_{1}$ महामात्र (→महामात्रो). ५१. –a) ने$_{2}$ देवी (→देवि). –b) ने$_{3}$ कमलेक्षणः (→कमलेक्षणे). –d) ने$_{1.3}$ सुसमाहितः (ने$_{1}$ °ताः) (→सुसमाहिता). ५२.–b) ने$_{1.3}$ कल्म° (→कल्प°).–d) ने$_{1}$ शुभम् (→स्मृतम्). ५३.–b) ने$_{2}$ समर्प्य (→संतर्प्य). –c) ने$_{3}$ °भवनं (→°भुवनं). ५५. –c) ने$_{1}$ °सदृशां (→°सदृशं).
५६. –b) ने$_{1.2}$ °वर्णिनी (→°वर्णिनि).

ततस्तु मानसक्षेत्रे भगीरथसरं स्मृतम् ।
तत्र स्नात्वा नरो देवि विश्वनाथस्य पूजनात् ॥ ५७ ॥

यत्फलं समवाप्नोति तत्फलं लभते ध्रुवम् ।
स्थापितं नृपसिंहेन लिङ्गं मे वरवर्णिनि ॥ ५८ ॥

भगीरथेशनामं वै सम्पूज्य मनुजाधमाः ।
प्राप्नुवन्ति गृहं कान्तं नन्दिकेशनिषेवितम् ॥ ५९ ॥

ततस्तु मानसक्षेत्रे वज्रतीर्थमिति स्मृतम् ।
यत्र सूर्यस्य तनुजो धर्मराजो महामतिः ॥ ६० ॥

कालदण्डं च मुद्रां च प्राप विष्णोरनुग्रहात् ।
तत्र स्नात्वा महादेवि यमलोकं न पश्यति ॥ ६१ ॥

ततस्तु चित्रगुप्ताख्यं तीर्थमस्ति महेश्वरि ।
चित्रगुप्तः स्वयं यत्र धर्माधर्मस्य निर्णयम् ॥ ६२ ॥

करोति यतवान् नित्यं सुविचार्य पुनः पुनः ।
तत्र स्नात्वा महादेवि विद्यावाञ्जायते नरः ॥ ६३ ॥

ततो विष्णुप्रयागाख्यं तीर्थमस्ति महेश्वरि ।
तत्र स्नात्वा नरः सम्यक् विष्णुलोकं प्रपश्यति ॥ ६४ ॥

परं रामप्रयागाख्यं तीर्थं त्रिदशसेवितम् ।
तत्र स्नात्वा नरो देवि सप्तविंशत्कुलान्वितः ।
प्रयाति विष्णुभवनं सेवितः किन्नरीगणैः ॥ ६५ ॥

मुचुकुन्दाह्वयं तीर्थं परं त्रिदशसेवितम् ।
योजनत्रयगम्भीरं कटूष्णजलसंनिभम् ।
तत्र स्नात्वा नरो देवि महेन्द्रपदमश्नुते ॥ ६६ ॥

कैलासवामभागे वै कलापाख्यो महागिरिः ।
गुहाभिर्द्वादशैर्युक्तो रजताकरशोभितः ॥ ६७ ॥

तत्रोत्तीर्णा सरिच्छ्रेष्ठा सुनन्दा हंससेविता ।
स्वर्णाभा हिमसम्भूता पूरिता स्वर्णधातुभिः ॥ ६८ ॥

---

५९. -d) ने1 नन्दिकेशं (→नन्दिकेश-).
६२. -b) ने1 चित्रमस्ति (→तीर्थमस्ति). ६४. -b) ने1.2 महेश्वरी (→महेश्वरि).
६५. -e) ने1 °भुवनं (→°भवनं). ६६. -a) ने1 मुचकुण्डा° (→मुचुकुन्दा°).
-b) ने1 कटुस्रजलसेवितं, ने2 कटुद्बजलसंनिभम्. -e) ने1 महेन्द्रं (→महेन्द्र-).
६७. -b) ने1 कालापाख्यो (→कलापाख्यो). ६८. -a) ने1 तत्रोत्कीर्णा, ने2 तत्रातीर्णा (→तत्रोत्तीर्णा). -d) ने2 °धानभिः (→°धातुभिः).

नानाविधैः पक्षिरुतैः सेविता सरितां वरा ।
मनसा मानसक्षेत्रे विधात्रा चोपदेशिता ॥ ६९ ॥

धनुषाग्रेण वै राज्ञा दर्शिताध्वा सरिद्वरा ।
जगाम मानसक्षेत्रं सुनन्दा सरितां वरा ॥ ७० ॥
सुनन्दस्य महायज्ञे समाहूता महर्षिभिः ।
मूले तस्याः स्थितो यज्ञे सुनन्दः सुमहातपाः ।
तस्य संदर्शनात् सद्यः प्राप्नुवन्ति नरा हरिम् ॥ ७१ ॥

सुनन्दायां ततो देवि कालात्मा विश्वभावनः ।
शिलायां संस्थितः सूर्यो दृश्यते वरवर्णिनि ॥ ७२ ॥
तं दृष्ट्वा भूतभव्येशं सम्पूज्य विधिपूर्वकम् ।
रमते सुचिरं कालं सूर्यलोके हि मानवः ॥ ७३ ॥

ततो कूर्मह्रदं दिव्यं विद्यते वरवर्णिनि ।
तत्र स्नात्वा नरो देवि रूपवाञ्जायते भुवि ॥ ७४ ॥

तथैव दक्षिणे तीरे कूर्मधारां सुपुजिताम् ।
स्नात्वा सायुज्यतां यान्ति वासुदेवस्य सुव्रते ॥ ७५ ॥
तथा कूर्मशिलां पूज्य वामे गिरिशवल्लभे ।
जायते दिव्यदेहो वै मानवो भुवि संस्थितः ॥ ७६ ॥

तत्रैव वासुकीतीर्थं मीनतीर्थं ततः परम् ।
ततो गौतमतीर्थं वै तीर्थं नारदसंज्ञकम् ।
तेषु स्नात्वा नरो देवि सहस्राब्दं वसेद्दिवि ॥ ७७ ॥
ततो वामे महाकालो गुहायां वरवर्णिनि ।
संपूज्य मानवः सम्यक् प्रियो मे जायते भुवि ॥ ७८ ॥

ततः सा सरितां श्रेष्ठा सुनन्दा मानसं गता ।
सुनन्दासङ्गमे देवि सुनन्देशं महेश्वरम् ।
संपूज्य मानवः सम्यङ् मद्भक्तिं समवाप्नुयात् ॥ ७९ ॥

---

६९. –a) ने1 विहग°, ने2 पति° (→पक्षि°). –b) ने2 वराः (→वरा). –c) ने1 मानसा (→मनसा); ने2 °क्षेत्रं (→°क्षेत्रे). –d) ने2 नोपदेशिता (→चोपदेशिता). ७०. –a) ने1.2 राजा (→राज्ञा). ७२. –a) ने1 सुनन्दाया (→सुनन्दायां). –c) ने2 सूर्ये (→सूर्यो). –d) ने1 2 °वर्णिनी (→°वर्णिनि). ७५. –c) ने1.2 सायोज्यतां (→सायुज्यतां). ७७. –a) ने1 ततस्तु (→तत्रैव). –b) ने1.2 स्मृतं (→परम्). –c) ने2.3 तु (→वै). –d) ने2.3 ततो (→तीर्थं). –f) ने1 सहस्राहं (→सहस्राब्दं).

७८. –a) ने1.3 महाकाले (→महाकालो). ७९. –c) ने2 देशि (→देवि).

ततस्तु मानसक्षेत्रे देवगन्धर्वपूजिते ।
कुबेरतीर्थेति विख्यातं पातकान्तकरं शुभे ।
तत्र स्नात्वा देवपूज्यो मानवो जायते शुभे ॥ ८० ॥

ततो दिलीपतीर्थं वै विद्यते वरवर्णिनि ।
यत्र साङ्गाश्वमेधस्य स राजा फलमाप्तवान् ।
तत्र स्नात्वा नरो देवि कुबेरपदवीं व्रजेत् ॥ ८१ ॥

शाकुन्तलेयो भरतो यत्तमजितवान् पुरा ।
भरतेशं हरं तत्र गुहायां लिङ्गरूपिणे ॥ ८२ ॥
संपूज्य मृगशावाक्षि भारतश्रवणं फलम् ।
प्राप्नोति मानवः सम्यक् प्रसादान् मम वल्लभे ॥ ८३ ॥

ततो मेरुरिति ख्यातः पर्वतप्रवरः शुभे ।
महामरकतप्रख्यो देवगन्धर्वसेवितः ॥ ८४ ॥

तत्रोत्तीर्णा सरिच्छ्रेष्ठा पुण्या गुप्तसरस्वती ।
वसिष्ठस्य महाज्ञेय आहूता च महर्षिभिः ॥ ८५ ॥

मनसा मानसक्षेत्रे विधात्रा सा नियोजिता ।
सूर्यवंशप्रदीपेन गुप्तमार्गे प्रदर्शिता ॥ ८६ ॥
ययौ सा मानसक्षेत्रे सुशीतविमले जले ।
तस्या मूले स्थितो ब्रह्मा मध्ये देवर्षयस्तथा ॥ ८७ ॥

कट्यां वै पद्मनाभस्तु पादौ चाहं प्रतिष्ठितः ।
तस्यां स्नात्वा नरो देवि दिव्यदेहो हि जायते ॥ ८८ ॥

सरस्वत्या महादेवि सङ्गमे स्नाति यो नरः ।
स याति विष्णुभवनं पुनरावृत्तिदुर्ल्लभम् ॥ ८९ ॥

ततो मेरुसमुद्भूता सेविता हिमसीकरैः ।
स्वर्णधारासरिच्छ्रेष्ठा सुतोया स्वर्णसन्निभा ॥ ९० ॥
मनसा मानसक्षेत्रे विधात्रा चोपदेशिता ।
नृपेण दर्शिताध्वा सा ययौ मानसरोवरम् ॥ ९१ ॥

---

८०. ने2. cd ⊙. ८२. -d) ने2 गुहाया (→गुहायां). ८४. -b) ने3 पर्वतः (→पर्वत-). -c) ने1.3 °मरकतः (→°मरकत-). ८५. -a) ने3 तत्रोत्तोर्ण- (→तत्रोत्तीर्णा). ८८. -a) ने2 भग्न° (→पद्म°). -d) ने1 दिव्यं (→दिव्य-); ने3 °देहे (→°देहो); ने3 तापते (→जायते).

९०. -b) ने3 °शीकरैः (→°सीकरैः). -d) ने2 मृतोया (→सुतोया).

९१. -b) ने2 विधाता (→विधात्रा).

स्वर्णधारेति विख्याता पतिता मेरुमूर्द्धनि ।
पूजिता देवगन्धर्वैर्महर्षिभिरभिष्टुता ॥ ९२ ॥

देवदुन्दुभिनिर्घोषा जातीकुसुमसन्निभा ।
तच्छिरोपरि राजर्षे कमला नाम वै गुहा ॥ ९३ ॥

तत्र त्वं मृगशावाक्षि महर्षिभिरभिष्टुता ।
राजसे बालचरितैर्महामायेति विश्रुता ॥ ९४ ॥

संपूज्य तां महाभागे गुहायां संस्थितां शिवाम् ।
ऋषिभिर्बहुभिर्युक्ता विराजन्ते नरा भुवि ॥ ९५ ॥

ततस्तु स्वर्णधाराया दक्षिणे वरवर्णिनि ।
वराहाख्यां शिलां पूज्य नरो शिवपुरं व्रजेत् ॥ ९६ ॥

ततस्तु स्वर्णधारायां नरसिंहह्रदं शुभम् ।
तत्र स्नात्वा च मनुजो हरिभक्तिमवाप्नुयात् ॥ ९७ ॥

परं तु कमलातीर्थं दृश्यते यवरूपिणी(?) ।
देवि विष्णोः प्रिया लक्ष्मी भुक्तिभुक्तिप्रदायिनी ।
तत्र संपूज्य कमलामतुलां श्रियमवाप्नुयात् ॥ ९८ ॥

सङ्गमे स्वर्णधारायाः सरराजस्य वै शुभे ।
स्वर्णधातुमयं लिङ्गं मदीयं ये भजन्ति हि ।
तेषां मम गृहे वासो विद्यते वरवर्णिनि ॥ ९९ ॥

सङ्गमे स्वर्णधारायाः शृणुष्व परमेश्वरि ।
श्राद्धं कृत्वा च मतिमान् कुलानां तारयेच्छतम् ॥ १०० ॥

ततस्तु मानसक्षेत्रे तीर्थं त्रिदशसेवितम् ।
पुण्यं ब्रह्मकपालाख्यं शिलायां चाति शोभितम् ॥ १०१ ॥

तत्र श्राद्धं गयाश्राद्धादनन्तगुणितं स्मृतम् ।
तत्रैव मुण्डनं कृत्वा चोपवासं विशेषतः ॥ १०२ ॥

निमज्य मानसक्षेत्रे विधिदृष्टेन कर्मणा ।
संतर्प्यं च पितॄन् सर्वान् ब्रह्मलोकमवाप्नुयात् ॥ १०३ ॥

---

९२. –d) ने1.2 अभिष्टुताः (ने2 °तः) (→अभिष्टुता).
९५. –a) ने1 तं (→तां). –c) ने2 ऋद्धिभिर् (→ऋषिभिर्).
९७. ने1. ⊙. –b) ने2 नाद° (→नर°).
९९. –f) ने1-3 °वर्णिनी (→°वर्णिनि).
१००. –c) ने1 मनुजो (→मतिमान्).
१०२. –b) ने3 शुभं (→स्मृतं).

सनत्कुमारनामे वै तीर्थे स्नात्वा यतव्रते ।
तत्रैव मानसक्षेत्रे नरो हरिपुरं व्रजेत् ॥ १०४ ॥
अश्विनाख्यं महातीर्थं ततो मानसरोवरे ।
यत्र वै चाश्विनीपुत्रौ कुमारौ ब्रह्मवादिनौ ॥ १०५ ॥
स्नात्वा महेन्द्रभवने संप्राप्तौ कविपूजितौ ।
तत्र स्नात्वा नरो देवि महेन्द्रभवनं व्रजेत् ॥ १०६ ॥
ततस्तु मानसक्षेत्रे देवर्षिगणसेविते ।
धर्माधर्माह्वयं तीर्थमावर्तैर्बहुभिर्युतम् ।
तत्र स्नात्वा च मनुजो मोदते देववद्दिवि ॥ १०७ ॥
ततो महेन्द्रनामा वै पर्वतः पर्वतेन्द्रजे ।
सप्तमो गिरिराट् पुण्यो मया ख्यातो न संशयः ॥ १०८ ॥
तस्माद् विनिःसृता देवि माहेन्द्री सरितां वरा ।
जयन्तस्य स्वसा भूता या भूता सरितां वरा ॥ १०९ ॥
महेन्द्रपर्वतोद्देशे पतिता सा सरिद्वरा ।
मनसा मानसक्षेत्रे ब्रह्मणा चोपदेशिता ॥ ११० ॥
सूर्यवंशप्रदीपेन दर्शिताध्वा सरिद्वरा ।
देवेन्द्रेण समाज्ञाता प्रार्थिता सिद्धनायकैः ॥ १११ ॥
जगाम मानसक्षेत्रं देवर्षिगणसेवितम् ।
नाम्ना पाशुपतं नाम शिवकिङ्करसेवितम् ॥ ११२ ॥
तस्या मूले महादेवः सेवितः किन्नरोरगैः ।
विद्यते मृगशावाक्षि पूजितः सुरनायकैः ॥ ११३ ॥
तं दृष्ट्वा मानवः सम्यक् प्रयाति शिवमन्दिरम् ।
कुलैर्द्वादशभिर्युक्तो विहाय पातकान् स्वकान् ॥ ११४ ॥
ततो माहेन्द्रिमध्यस्थं तीर्थं ब्रह्मर्षिसेवितम् ।
तत्र स्नात्वा महादेवि मम सायुज्यमश्नुते ॥ ११५ ॥
ततो माहेन्द्रिमध्ये वै तीर्थं मकरसंज्ञकम् ।
तत्र स्नात्वा च मनुजो मातुर्गर्भं न पश्यति ॥ ११६ ॥

---

१०४. –d) ने1 हरपुरं (→हरिपुरं).
१०६. –b) ने1 लोक° (→कवि°). १०७. –d) ने2 मतम् (→युतम्).
१०९. –d) ने2 माहेन्द्रि–, ने3 माहेन्द्र– (→या भूता).
११२. ने1. cd. ⊙.
ने3. ११३-११५ b. ⊙. ११५. –a) ने2 ततो माहेंद्रिमध्यं वै.
११६. –a) ने3 माहेन्द्र° (→माहेन्द्रि°). –b) ने1 तीर्थ– (→तीर्थं).

ततः सा सरितां श्रेष्ठा माहेन्द्री मानसं सरम् ।
जगाम तीर्थबहुला स्वधाफेनमिवापरा ॥ ११७ ॥

माहेन्द्रीसङ्गमे देवि महेन्द्रेशं महेश्वरम् ।
संपूज्य मानवः सम्यक् शिवलोके महीयते ॥ ११८ ॥

ततस्तु मानसक्षेत्रं वारुणी सरितां वरा ।
जगाम मानसक्षेत्रं द्वितीयमिव सागरम् ॥ ११९ ॥

ब्रह्मणा चोपदिष्टा सा सरितां प्रवरा सरित् ।
सूर्यवंशप्रदीपेन दर्शिताध्वा महानदी ।
प्रविष्टा मानसक्षेत्रं शीतपीतजलं शुभम् ॥ १२० ॥

तस्या मूले च वरुणो वसति त्रिदिवेश्वरि ।
संपूज्य वरुणं देवं सर्वपापैः प्रमुच्यते ॥ १२१ ॥

ततस्तु वारुणीमध्ये ब्रह्मर्षिगणसेवितम् ।
नाम्ना पाशुपतं नाम शिवकिङ्करसेवितम् ।
तत्र स्नात्वा नरो देवि मम सायुज्यमश्नुते ॥ १२२ ॥

ततस्तु वारुणीमध्ये सूर्यकुण्डमिति स्मृतम् ।
तत्र स्नात्वा च मनुजो रवेर्मण्डलमध्यगः ।
जायते मृगशावाक्षि सत्यं ते व्याहृतं मया ॥ १२३ ॥

ततस्तु वारुणीमध्ये चक्रतीर्थमिति स्मृतम् ।
तत्र स्नात्वा च मनुजो विष्णुलोके महीयते ॥ १२४ ॥

वारुण्या वामभागे वै क्रौञ्चाख्या हि महागुहा ।
तत्र धूर्जटिनामानं संपूज्य मनुजेश्वरि ।
मम लोकमवाप्नोति प्रसादान् नात्र संशयः ॥ १२५ ॥

ततः सरोवरं पुण्यं वारुणी सरितां वरा ।
संमिलन् मृगशावाक्षि तोयावर्तसमाकुला ॥ १२६ ॥

तत्र संपूज्य मनुजा वरुणेशं महेश्वरम् ।
मम सायोज्यतां यान्ति महेन्द्रेण प्रपूजिताः ॥ १२७ ॥

---

११७. –b) ने2 महेन्द्री (→माहेन्द्री). –d) ने2.3 °पर (→°परा).
११९. –b) ने1 सरिता (→सरितां).
१२१. –b) ने2 वसंति (→वसति). १२२. ने1. ⊙.
१२७. –d) ने3 प्रपूजितः (→प्रपूजिता).

ततो मानसरे देवि ब्रह्मतीर्थमिति स्मृतम् ।
पावनं स्थिरचित्तानां मानवानां दुरात्मनाम् ॥ १२८ ॥
तत्र स्नात्वा च मनुजो वह्नितीर्थे महेश्वरि ।
सप्तजन्मार्जितान् पापान् निमज्य क्षालितं जनः ।
करोति मृगशावाक्षि सत्यं सत्यं न संशयः ॥ १२९ ॥
ततो मानसरे देवि महेन्द्रगिरिसंभवा ।
स्वातिनामा सरिच्छ्रेष्ठा देवर्षिगणसेविता ॥ १३० ॥
मनसा मानसक्षेत्रे ब्रह्मणा चोपदेशिता ।
सूर्यवंशप्रदीपेन दृष्टमार्गा सरिद्वरा ॥ १३१ ॥
पुलस्त्यस्य महायज्ञे समाहूता महर्षिभिः ।
ययौ मानसरं देवि यत्र हंससरोवरः ॥ १३२ ॥
तस्यां निमज्य मनुजो दुःकृतानां शतं महत् ।
विहाय देवलोके वै सुचिरं वसति ध्रुवम् ॥ १३३ ॥
तस्या मूले महादेवि त्वमेव पूजिता ह्यसि ।
तां दृष्ट्वा मानवः सम्यगृद्धिं विन्दति भूतले ॥ १३४ ॥
स्वात्यां तीर्थाण्यनेकानि सन्ति वै शिववल्लभे ।
तेषां हि नाम संख्यानं न शक्नोमि यतव्रते ॥ १३५ ॥
स्वातिमानसयोः सङ्गं (ङ्गे ?) पुण्यं हंससरोवरम् ।
निमज्य मानवः सम्यक् पूज्यते देववद् भुवि ॥ १३६ ॥
यत्र हंसः कलत्रेण सह पुत्रान्वितोऽपि हि ।
स्मृत्वा वसिष्ठगीतं वै निर्ममो निरहङ्कृतः ।
संन्यस्य विधिवद् देवि जगाम ब्रह्मणः पदम् ॥ १३७ ॥

श्रीदेव्युवाच ।

कथं सरोवरे पुण्ये हंसो वै परमेश्वर ।
संन्यस्य स कथं धन्यो प्राप ब्रह्मपदं शुभम् ॥ १३८ ॥

ईश्वर उवाच ।

द्वापरादौ महादेवि बभूव द्विजनायकः ।
वेगवान् नाम वै हंसो धर्मात्मा धातृवल्लभः ॥ १३९ ॥

---

१२८. १२८ cd–१२९b ने1. ⊙. –b) ने1 वह्नितीर्थे महेश्वरी.
१३८. –b) ने2 परमेस्वरी (→परमेश्वर). १३९. –d) ने2.3 धातु° (→धातृ°).

स कदाचिन् महाभागे पुत्रकलत्रपोषकः ।
जगाम मानसक्षेत्रे पुत्रदारान्वितो हि सः ॥ १४० ॥
तत्र वृद्धमृषिं श्रेष्ठं वसिष्ठं शुभलक्षणम् ।
ददर्श स महाभागं साक्षाद् द्विजकलाधरम् ॥ १४१ ॥
तं नत्वा स तदा पक्षी वाष्पव्याकुलितेन्द्रियः ।
पप्रच्छ स ऋषिं देवि कथं मुक्तो भवामि वै ॥ १४२ ॥
तमुवाच तदा विप्रः प्रहृष्टेनान्तरात्मना ।
असारभूते संसारे नास्ति सारमयं क्वचित् ॥ १४३ ॥
धर्ममार्गं विना हंस नान्यमार्गं निषेवय ।
तेन मुक्तिमवाप्नोति तं वाञ्छन्ति यतव्रता[ः] ॥ १४४ ॥
कलत्रपुत्रादिभिरन्विता जनाः
कथं हि सद्धर्मपथं व्रजन्ति वै ।
तस्मात् कुटुम्बं सुविहाय वै खग
व्रजस्व धर्मस्य पथं सुनिर्मलम् ॥ १४५ ॥
पुत्रदारादिभिर्भूतं सागरं ये त्यजन्ति हि ।
ते यान्ति विष्णुभवनं पुनरावृत्तिदुर्लभम् ॥ १४६ ॥
इति गीतं वसिष्ठस्य श्रुत्वा हंसो महामनाः ।
विहाय पुत्रदारादीन् तपस्तेपे सुदुष्करम् ।
ब्रह्माणं स तदा देवि पूजयामास वै तदा ॥ १४७ ॥
ततो ब्रह्मर्षिभिः सार्द्धं ब्रह्मा लोकपितामहः ।
तस्मै प्रदर्शयामास दर्शनं लोकनायकः ॥ १४८ ॥
तं दृष्ट्वा सहसोत्थाय वाष्पव्याकुलितेन्द्रियः ।
तुष्टाव प्रणतो भूत्वा ब्रह्माणं देवपूजितम् ॥ १४९ ॥

हंस उवाच ।

नमो नमस्ते हरिवल्लभाय
हरिप्रपूज्याय महाभुजाय ।
चतुर्मुखाय सुमुखष्टुताय
तस्मै विधात्रे कमलासनाय ॥ १५० ॥

---

१४०. –c) ने$_2$ °क्षेत्रं (→°क्षेत्रे).

१४६. –c) ने$_1$ °भुवनं (→°भवनं). १४७. –b) ने$_2$ महात्मनः (→महामनाः). १४८. –b) ने$_2$ °पितामहा (→°पितामहः). –d) ने$_3$ °नायकं (→°नायकः). १४९. –c) ने$_3$ प्रयती (→प्रणतो). १५०. –c) ने$_1$ सुमुषस्तुताय (→सुमुखष्टुताय).

प्रजापतीनां पतये नमस्ते
वेदान्तवेद्याय नमो नमस्ते ।
महेन्द्रसूर्यादिभिः संस्तुताय,
तस्मै विधात्रे प्रणमामि तुभ्यम् ॥ १५१ ॥

ईश्वर उवाच ।

इति हंसेरितं पुण्यं स्तवं श्रुत्वा पितामहः ।
उवाच वदतां श्रेष्ठश्चातिगम्भीरया गिरा ॥ १५२ ॥

ब्रह्मा उवाच ।*

सुप्रीतोऽस्म्यद्य ते वत्सतपसा च स्तवेन च ।
वरं वरय भद्रं ते यत्ते मनसि वर्तते ॥ १५३ ॥

ईश्वर उवाच ।

ततो वव्रे विधातारं स हंसस्तुष्टमानसः ।
निवासं ब्रह्मलोके वै पुत्रपौत्रसमन्वितः ॥ १५४ ॥
पुनरेव विधातारं स हंसः शिववल्लभे ।
मानुषाणामदृश्यत्वं कलौ हंसा भवन्त्विति ॥ १५५ ॥
तथेत्युक्त्वा तदा ब्रह्मा ब्रह्मर्षिगणसेवितः ।
जगाम ब्रह्मभवनं सिद्धगन्धर्वसेवितम् ॥ १५६ ॥
स कलत्रान्वितो हंसो विमानमधिरुह्य वै ।
ब्रह्मलोकं जगामाशु पूजितः सिद्धनायकैः ॥ १५७ ॥
ततः प्रभृति वै देवि हंसान् वै पापकारिणः ।
न पश्यन्ति महादेवि जना भूमण्डले क्वचित् ॥ १५८ ॥
इत्येतत् कथितं देवि हंसाख्यानं सुविस्तरम् ।
स कलत्रान्वितो हंसो यथा ब्रह्मभुवं गतः ॥ १५९ ॥
तस्मिन् हंससरे स्नात्वा सन्तर्प्य च पितॄन् स्वकान् ।
त्रिसप्तकुलमुद्धृत्य ब्रह्मलोके महीयते ॥ १६० ॥
ततो ब्रह्मकपालाख्ये तीर्थे पिण्डप्रदानतः ।
समुद्धरन्ति वै मर्त्याः कुलमेकोत्तरं शतम् ॥ १६१ ॥
अपि पातकसाहस्रैः संप्लुतोऽपि महेश्वरि ।
निमज्य हंसतीर्थे वै शुद्धो भवति मानवः ॥ १६२ ॥

---

१५२. –b) ने2 °महाः (→°महः). –c) ने3 श्रेष्ठो (→श्रेष्ठश्).
* ने1 ब्रह्मोवाच.
१५५. –c) ने1 अदृश्यत्व (→अदृश्यत्वं). –d) ने1 भवत्विति (→भवन्त्विति).
१५६. –c) ने1 °भुवनं (→°भवनं). १६२. –b) ने1 महेश्वरी (→महेश्वरि).

तस्मिन् हंससरे स्नात्वा ककुत्स्थो नाम वै नृपः ।
ममैव पदवीं पुण्यां प्राप्तवान् संशितव्रते ॥ १६३ ॥
हंसतीर्थात् परं तीर्थं न पश्यामि महेश्वरि ।
चत्वारिंशत् सहस्राणि सन्ति तीर्थानि मानसे ॥ १६४ ॥
प्राधान्येन महादेवि व्याख्यातानि न संशयः ।
चतुर्दश महानद्यो याभिः संपूरितं सरः ॥ १६५ ॥
पुण्यतीर्थान्विताः सर्वाः सर्वाः पुण्यजलाशयाः ।
कथिता मृगशावाक्षि मूलैर्बहुभिरन्विताः ॥ १६६ ॥
तथैव गिरयः पुण्याः सप्तसप्तर्षयो यथा ।
गुहाभिर्बहुभिर्युक्ता यैः पुण्यैः परिवेष्ठितः ।
सरोवरस्य तीर्थानां माहात्म्यं कथितं मया ॥ १६७ ॥
स्वर्णहंसस्य व्याख्यानं तथा मानसरस्य च ।
कथितं मृगशावाक्षि किमन्यत् प्रष्टुमिच्छसि ॥ १६८ ॥
येनेदं मानसो नाम खण्डो वै समुदाहृतः ।
यस्माद्धि सरितः सर्वाः संभूताः शिववल्लभे ॥ १६९ ॥
पुण्ये मानसखण्डे वै सुरगन्धर्वसेविते ।
मर्यादालङ्घनं यस्य नास्ति कालत्रयेऽपि हि ।
तस्य माहात्म्यकथने कः समर्थोऽस्ति मानिनि ॥ १७० ॥
येनेयं सादिता भूमि(मिः ?) शतयोजनविस्तृता ।
येन कैलासशिखरः सेव्यतेऽहर्निशं शुभे ॥ १७१ ॥
प्राप्ते कलियुगे घोरे पुण्यो मानसरोवरः ।
पर्वतैः सादितो भूत्वा क्षीणत्वमुपयास्यति ॥ १७२ ॥
इत्येतत् सरमाहात्म्यं मया ते व्याहृतं सति ।
तीर्थैरनेकसाहस्रैरन्वितं पातकान्तकम् ॥ १७३ ॥
यः शृणोति महाभागे वाचयेद्वा समाहितः ।
त्रिसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥ १७४ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे सरोवरमाहात्म्यं नामाष्टादशोऽध्यायः ॥ १८ ॥**

---

१६३. –c) ने2.3 पुण्यं (→पुण्यां). १६४. –b) ने1 महेश्वरी (→महेश्वरि). १६५. –b) ने1 *ख्याताति (→व्याख्यातानि). १६९. –b) ने2 यै (→वै). १७०. –b) ने2 °सेवित (→°सेविते).

# १९

दत्त उवाच ।

विकसद्वदनाम्भोजा गौरी गौरीश्वरं प्रभुम् ।
पुनरेव महाभागा प्रपच्छातिकुतूहलात् ॥ १ ॥

देव्युवाच ।

सरोवरस्य माहात्म्यं त्वत्प्रसादान् मया श्रुतम् ।
कुत्र ते देवदेवेश वासः समनुवर्णय ।
एतद्वै श्रोतुमिच्छामि त्वत्प्रसादान्महेश्वर ॥ २ ॥

ईश्वर उवाच ।

शृणुष्व मम चार्वङ्गि वचनं समुदाहृतम् ।
स्थानेषु च सुपुण्येषु वसामि वसुधातले ॥ ३ ॥
तथाप्येकं महाभागे कथयामि स्थलं महत् ।
यत्र मे विद्यते वासस्त्वया सह न संशयः ॥ ४ ॥
लङ्कामानसयोर्मध्ये गुहा याः समुदाहृताः ।
तासां मध्ये महाभागे वरिष्ठैका महागुहा ॥ ५ ॥
शूलप्रियेति विख्याता सचान्द्रेव कुमुद्वती ।
तस्यां वसामि वै भद्रे त्वया सह न संशयः ॥ ६ ॥
वह्नितेजोपमं मां वै तत्र पश्यन्ति किन्नराः ।
तस्मान् नान्यस्थले देवि वासो मे विद्यते क्वचित् ॥ ७ ॥
तत्र ये मां प्रपश्यन्ति दिव्यशूलधरं हरम् ।
तेषां मृत्युभयं घोरं नास्ति नास्ति भुवःस्थले ॥ ८ ॥
दर्शनाद् यत्र मे देवि वाजिमेधसहस्रजम् ।
प्राप्नुवन्ति फलं पुण्यं तस्मात् कोऽन्यतमः स्थलः ॥ ९ ॥
यस्या द्वारं महाभागे एकं कैलासमूर्द्धनि ।
संप्राप्य कौतुकाविष्टः पुष्पदन्तो महामतिः ॥ १० ॥

---

१. –a) ने2 °म्भोगो (→°म्भोजा). –b) ने1 गौरेश्वरं (→गौरीश्वरं). –c) ने3 °भाग (→°भागा). –d) ने2 पप्रच्छामि (→पप्रच्छाति–) २. –d) ने1 समनुवर्णितः (→समनुवर्णय). –f ) ने1 महेश्वरः (→महेश्वर). ३. –a) ने1 चार्वाङ्गि, ने2 चार्वङ्गी (→चार्वङ्गि). ६. –b) ने1 कुमुद्वति (→कुमुद्वती). ७ –c) ने2 देवी (→देवि). १०. –d) ने3 पुष्पदत्तो (→पुष्पदन्तो).

प्रविश्य तां गुहां पुण्यां ममाग्रे स ययौ पुरा ।
स दृष्ट्वा महिमानं मे प्राप भक्तिमनुत्तमाम् ॥ ११ ॥

देव्युवाच ।

स कथं पुष्पदन्तो वै प्राप पुण्यं महागुहाम् ।
कथं ते महिमानं वै दृष्ट्वा भक्तिमवाप्तवान् ॥ १२ ॥

कथं कैलासमध्ये वै गुहाद्वारमभूत् प्रभो ।
लङ्कामानसयोर्मध्ये कथं सा वर्ण्यते गुहा ॥ १३ ॥

ईश्वर उवाच ।

शृणुष्व तां गुहां देवि ब्रह्मा लोकपितामहः ।
विरच्य विविधद्वारैः संवृतां स्फाटिकीं यथा ॥ १४ ॥

लङ्कामानसयोर्मध्ये द्वारमेकं विरच्य वै ।
एकं कैलासमध्ये वै विरच्य स प्रजापतिः ।
मां वै विज्ञापयामास निवासाय महामतिः ॥ १५ ॥

सोऽहं तद्वचनाद् देवि त्वया सह गुहां तदा ।
प्राप्तवानस्मि वै सद्यो नन्दिकेन समन्वितः ॥ १६ ॥

दृष्ट्वा पुण्यां महाभीमां गुहां चन्द्रनिभां तदा ।
निवासं रुरुचे तत्र त्वया सह महेश्वरि ॥ १७ ॥

ततः कालेन महता पुष्पदन्तो महामनाः ।
विजहार तटे रम्ये मन्दाकिन्या महेश्वरि ॥ १८ ॥

ततः कैलासशिखरे विहरन् स महामतिः ।
ददर्श स गुहाद्वारं रचितं पद्मयोनिना ॥ १९ ॥

द्वारे तस्मिन् महादेवि गन्धर्वाधिपतिस्तदा ।
प्रविवेश महाभागः कौतुकाविष्टमानसः ॥ २० ॥

परित्यज्य गुहाः सर्वा गुहाद्वारान् विलङ्घ्य सः ।
विहायान्यान् शिवगणान् मामेव शरणं गतः ॥ २१ ॥

ततो ददर्श मां देवि ज्वलदग्निशिखोपमम् ।
सहस्रादित्यसंकाशं तुष्टाव प्रणताञ्जलिः ॥ २२ ॥

---

१४. –a) ने1 गुहा (→गुहां). १६. –a) ने3 त्वद्वचनाद् (→तद्वचनाद्). १७. –d) ने2 सम (→सह). १९. –b) ने2 निहरेत् (→विहरन्). २०. –c) ने2 महाभागः (→महाभाग). २१. –c) ने1 सुर° (→शिव°). २२. –b) ने2 °शिवो° (→°शिखो°).

पुष्पदन्त उवाच ।

नमो देवाधिदेवाय विरूपाक्षाय ते नमः ।
कपर्दिने नमस्तुभ्यं शितिकण्ठाय ते नमः ॥ २३ ॥

भवाय भवबीजाय सृष्टिस्थित्यन्तकारिणे ।
भूताय भूतनाथाय नागहाराय ते नमः ॥ २४ ॥

भस्मोद्धूलितसर्वाङ्गमौलिमालाधराय च ।
कालाय कालकल्पाय नमः कालान्तकाय च ॥ २५ ॥

महाभैरवरूपाय भैरवान्तकराय च ।
महादेवाय देवाय देवदेवाय ते नमः ॥ २६ ॥

पृथिवी वायुराकाश महिम्ना येन व्यापितम् ।
तस्मै शिवाय शान्ताय हराय च नमो नमः ॥ २७ ॥

इति तेन महादेवि संस्तुतस्तुषितोऽस्म्यहम् ।
मया तस्मै महापुण्या दर्शिताश्चाष्टसिद्धयः ॥ २८ ॥

वरेण ते तदा देवि भक्तिः समुपदेशिता ।
बभूव मन्त्रियुक्तेन पुष्पदन्तस्य सत्कृता ॥ २९ ॥

पुष्पदन्तोऽपि तत्रैव प्रहृष्टेनान्तरात्मना ।
विनिवद्धस्य(?) तां पुण्यां ययौ मानसरं शुभम् ॥ ३० ॥

लङ्कामानसयोर्मध्ये दृष्ट्वा द्वारं सुयन्त्रितम् ।
तस्मिन् द्वारे स्वनाम्ना वै लिङ्गं संस्थाप्य मे शुभम् ॥ ३१ ॥

निमज्य मानसक्षेत्रे ययौ निजगृहं प्रति ।
मत्तः सिद्धिमनुप्राप्य मोदते सुचिरं सति ॥ ३२ ॥

पुष्पदन्तस्य चाख्यानं मया ते कथितं सति ।
यथा सिद्धिमनुप्राप्य मोदते निजमन्दिरे ॥ ३३ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे शूलगुहामाहात्म्ये पुष्पदन्ताख्यानं नामैकोनविंशोऽध्यायः ॥ १९ ॥**

---

२८. -b) ने1 तुषितोस्महम् (→तुषितोऽस्म्यहम्). -d) ने1 दर्शिता (→दर्शिताश्). ३०. -c) ने1 चिरं निबद्धतां (→विनिवद्धस्य तां). ३१. -b) ने1 दृष्टां (→दृष्ट्वा). ३३. -a) ने1 चाख्यातं (→चाख्यानं).

ईश्वर उवाच ।

अथान्यदपि माहात्म्यं शृणुष्व मम वल्लभे ।
यं श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥

तादृशं हि स्थलं देवि न पश्यामि भुवःस्थले ।
यत्र मच्छिरसि पुण्या सुरभी कामरूपिणी ।
अभिषिञ्चति स्वस्तन्यैः कृत्वा धारां सहस्रशः ॥ २ ॥

तत्र तां सुरभीं देवीं संपूज्य गिरिकन्यके ।
मनोभिलषितां सिद्धिं प्राप्नुवन्ति जना भुवि ॥ ३ ॥

तत्र मे विद्यते वासो नान्यस्थाने महेश्वरि ।
तत्र देवास्त्रयस्त्रिंशन्मामेव न हि संशयः ॥
मन्दवारप्रदोषे वै सेवन्ते त्रिदशेश्वरि ॥ ४ ॥

संपूज्य विधिवत् तत्र त्वया सह महेश्वरि ।
निःक्रम्य च गुहाद्वारे पुष्पदन्तेश्वरं व्रजेत् ॥ ५ ॥

पुष्पदन्तेश्वरं तत्र संपूज्य परमेश्वरि ।
वाजपेयस्य यज्ञस्य फलमाप्नोति मानवः ॥ ६ ॥

ततो गच्छेन्महादेवि देवीं लोकेश्वरीं शुभाम् ।
पूजितां देवगन्धर्वैर्मानवैश्च महेश्वरीम् ।
संपूज्य मृगशावाक्षि सर्वपापैः प्रमुच्यते ॥ ७ ॥

ततो गच्छेन्महादेवि शूलपाणिं हरं व्रजेत् ।
शूलपाणिं हरं तत्र पूज्य पापैः प्रमुच्यते ॥ ८ ॥

इत्येतत् कथितं देवि गुहाया वर्णनं शुभम् ।
आयुरारोग्यमैश्वर्यसुखसम्पद्विवर्द्धनम् ॥ ९ ॥

---

ने$_1$. ईश्वर उवाच । ⊙.

२. –d) ने$_1$ सुपत्नी (→सुरभी). –f) ने$_1$ अभिसिञ्च्य निजस्तन्यैः ३. –c) ने$_1$ मनोभिलाषतां सिद्धि. ४. –f) ने$_{1.2}$ त्रिदशेश्वरी (→त्रिदिवेश्वरि). ५. –c) ने$_1$ त्रिःक्रम्य (→निःक्रम्य). –d) ने$_1$ पूज्य(→पुष्प–). ६. –a) ने$_1$ पूज्य (→पुष्प–). –b) ने$_1$ परमेश्वरी (→परमेश्वरि). ७ –b) ने$_2$ देवी– (→देवीं). –d) ने$_{1.2}$ महेश्वरी (→महेश्वरीं). ९. –c) ने$_2$ ऐश्वर्यं (→ऐश्वर्य–).

दत्त उवाच ।

इति श्रुत्वा महादेवी प्रहृष्टेनान्तरात्मना ।
निश्वासा चाभवद् देवी मेने पूर्णमनोरथाम् ।
तूष्णीं बभूव प्रणता शिवभक्तिपरायणा ॥ १० ॥

शिवेन कथितं पुण्यं मया ते समुदाहृतम् ।
यथावत् कथितं पुण्यं सर्वपापप्रणाशनम् ॥ ११ ॥

यस्माद्धि सुमहापुण्या सरितः संभवा किल ।
येनेदं मानसं नाम खण्डं तत् समुदाहृतम् ॥ १२ ॥

**इति श्रीस्कन्दपुराणे मानसखण्डे सरोवरमाहात्म्यं नाम विंशतितमोऽध्यायः ॥ २० ॥**

---

१०. –a) ने1 महादेवि (→महादेवी). –c) ने1.2 निश्वसा (→निश्वासा). –d) ने2.3 °मनोरथं (→°मनोरथाम्). –e) ने1.2 तूष्णी (→तूष्णीं).
१२. –a) ने3 सुमहापुण्याः (→सुमहापुण्या). –b) ने1.3 संभवाः (→संभवा).

THE BOARD OF TRUSTEES

OF

THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt.; Fort, Ramnagar, Varanasi.—(*Chairman*).

*Trustee nominated by the Govt. of India:—*

2. Dr. Raghunath Singh, M.A., Ph.D., D.Litt., LL.B.; Varanasi.

*Trustees nominated by the Govt. of Uttar Pradesh :—*

3. Pt. Kamalapati Tripathi, Member of Parliament; New Delhi.

4. Vacant.

*Trustees nominated by His Highness the Maharaja of Banaras.*

5. Maharaj-Kumar Dr. Raghubir Sinh, M. A., D. Litt.; Raghubir Niwas, Sitamau (Malwa).

6. Pt. Giridhari Lal Mehta, Varanasi; Managing Director : Jardine Handerson Ltd.; Scindia Steam Navigation Ltd. Trustee : Vallabhram-Saligram Trust, Calcutta.

7. Padmabhushan, Pt. Baladeva Upadhyaya, M.A., Sahityacharya, Vachaspati; Formerly Diractor, Sampurnananda Sanskrit University; Ravindrapuri, Varanasi.

Donation made to All-India Kashi Raj Trust, Fort Ramnagar, Varanasi, will qualify for exemption under Sec. 80G of the Income Tax Act, 1961 in the hands of donors.

Statement of ownership and other particulars about

## पुराणम्—PURĀṆA

| | | |
|---|---|---|
| 1. | Place of Publication | ....Fort Ramnagar, Varanasi |
| 2. | Periodicity of Publication | ... Half-yearly |
| 3. | Printer's Name | ....Vinaya Shankar |
| | Nationality | ....Indian |
| | Address | ....Ratna Printing Works, B21/42 A, Kamachha, Varanasi |
| 4. | Publisher's Name | ....Yogendra Narain Thakur General Secretary, All-India Kashiraj Trust |
| | Nationality | ....Indian |
| | Address | ....All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |
| 5. | Editors' Name with Address | ....R. K. Sharma (New Delhi), Dr. R. N Dandekar (Pune), R. S. Bhattacharya (*Editor*) (Purāṇa Deptt., Fort Ramnagar Varanasi). |
| | Nationality | ....Indian. |
| 6. | Name of the owner | ....All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |

I, Yogendra Narain Thakur, hereby declare that the particulars given above are true, to the best of my knowledge.

**Yogendra Narain Thakur**
Publisher.

Printed at the Ratna Printing Works, Kamachcha, Varanasi.